पत्रसौधः

(संस्कृतस्य आदर्शपत्राणि)

एस्. जगन्नाथः



सुरभारतीप्रकाशनम्
बेंगलूरु-५६० ०८५

पत्रसौधः

एस्. जगन्नाथः

प्रकाशकः
सुरभारतीप्रकाशनम्
११५/१७, कत्तरिगुप्पे, बनशंकरी तृतीय घट्टः
बेंगलूरु - ५६० ०८५.

PATRA SOUDHAḤ- A collection of model letters and business letters in Samskṛta for the benefit of students and interested public written by S. Jagannātha, and published by Dr. B.S. Ramakrishna Rao. for Surabhāratī Prakāśanam, Bangalore-85.

Pages : 96 (Crown 1/8)

First Edition : 1999

Copies can be had of :

1. **Surabhāratī Prakāśanam**
   115/17, Kattariguppe, BSK III Stage
   Bangalore - 560 085.

2. **Vedanta Book House**
   92, 6th Main Road,
   Chamarajapet, Bangalore-560 018

Printed and Typeset by :
Vāgartha Printonics,
8th Cross, N.R. Colony, Bangalore-19. Phone : 627677

संस्कृतबन्धुभ्यः पत्रम्

अयि संस्कृतबन्धवः,

अवलोक्यताम् !

इङ्ग्लीष्-ज्ञानं वर्धयितुकामानां जनानां कृते वर्तमानम् इङ्ग्लीष्वाणिज्यम् । यः कोऽपि पथि पथि भ्रमकः Good English, Improve your English, Better English, Two hundred letters इत्यादीन् शतशः ग्रन्थान् विक्रीणाति - यान् क्रीत्वा अधीत्य च आस्माकीनस्य इङ्ग्लीष्-ज्ञान-स्तरस्य वर्धनं कर्तुं शक्नुमः ।

संस्कृते त्वेतादृशा ग्रन्थाः केवलं त्रिचतुराः । तेऽपि सर्वत्र न लभ्यन्ते ।

यथा यथा संस्कृतग्रन्थानां सङ्ख्या वर्धिष्यते तथा तथा संस्कृतमपि तादृशं विश्वम् आविर्भावयिष्यति । संस्कृतेन पत्राणि लिलिखिषूणां (=लिखितुम् इच्छूनां) युष्माकं कृते रचितः एषः **'पत्रसौधः'** तस्यां दिशि टोटं पदम् (= little step) ।

ये जनाः (बालकाः, बालिकाः, युवानः, युवतयः, स्त्रियः पुरुषाः वा) संस्कृतेन पत्राणि लिलिखिषन्ति (=लिखितुम् इच्छन्ति) तस्मिन् विषये मार्गदर्शनं च कामयन्ते ते सर्वेऽपि ग्रन्थम् एतम् उपयोक्तुम् अर्हन्ति ।

संस्कृतशिक्षणक्षेत्रभिन्नेष्वपि क्षेत्रेषु संस्कृते सङ्क्रामिते - संस्कृतवाणिज्यादिकमपि अवतारं प्राप्नोति । तस्मादेव कारणात् अत्र वैयक्तिकैः पत्रैः सह व्यावहारिकाणि पत्राण्यपि विनिवेशितानि ।

अत्र च –

कालो वा कारणं राज्ञो राजा वा कालकारणम् ।
इति ते संशयो मा भूत् राजा कालस्य कारणम् ॥

(उद्योगपर्वणि १३०.१५)

इति वदन् व्यासः युष्माकं भुजास्फालनं करोति ।

अत्र प्रयुक्तायां भाषायां संस्कृतसरस्वत्याः करपादभङ्गो यथा न भवति तथा चेष्टितम् । एतेन वाक्येषु किञ्चन दार्ढ्यम् उत्पन्नमिति विषयं अभ्यासानन्तरं यूयं स्वयं ज्ञातुम् अर्हथ ।

पत्रसौधः पञ्चवर्षेभ्यः पूर्वमेव निर्मितः । एतावत्पर्यन्तम् अस्य द्वारे तालकं बद्धम् । कुञ्चिकया विमोचनम् अधुना विद्वत्सखः डा. बि.एस्.रामकृष्णराव् कृत्वा सौधद्वारम् उदघाटयत् - येन जनाः अन्तः प्रवेष्टुं शक्नुवन्ति । तस्मै धन्यवादाः समर्प्यन्ते ।

विहिताक्षरसंयोजन-मुद्रणाय वागर्थ प्रिण्टानिक्स् स्वामिने श्रीमते एम्.एन्. प्रसादाय धन्यवादाः विज्ञाप्यन्ते ।

बन्धवः, युष्माभिः किल पत्रसौधविषये मां प्रति पत्राणि लेखिष्यन्ते । तस्मात् युष्मभ्यमपि प्राङ्नमस्काराः अधुनैव सादरं मया विधीयन्ते ।

इति,
संस्कृतेन पत्राणि लिलिखिषुः,
युष्माकं स्नेहं च वाञ्छन्

मैसूरु
१९-३-१९९९

- जगन्नाथः

विषयानुक्रमणिका

पत्राणां महत्त्वम्

प्रेषाव्यक्तिः (Post person) यदाऽस्माकं समीपे आगच्छति तदाऽस्माकं नेत्रेण साकं हृदयमपि प्रफुल्लति । पत्रे किं भवेदिति कुतूहलं मानसमाक्रामति । अनिरीक्षितस्य पत्रस्य आगमने तु पत्रपठनात् प्राक् उत्कण्ठाऽत्यन्तं वृद्धिं गमिष्यति । पत्राणि वस्तुतः सम्पर्ककारीणि मित्राणि । 'सन्देशहराः दूताः' इत्यपि पत्राणां वर्णनं कर्तुं शक्यते । हर्षः, विषादः, विषयज्ञापनं, प्रत्युत्तरं, स्पष्टीकरणं, प्रार्थना-सर्वमपि पत्रेषु निधीयते । एष समासः - निखिलं वैयक्तिकं व्यावहारिकं च ब्रह्माण्डमेव पत्रेषु निक्षिप्यते ।

पत्रलेखनेन दूरतरं स्थितयोः द्वयोर्व्यक्त्योर्मध्ये सम्पर्कः सुलभायते । व्यावहारिकप्रसङ्गानां पञ्जीकरणं, वैयक्तिकीनां भावनानां (रागद्वेषादीन् निषेधात्मकान् दोषान् त्यक्त्वा) परिचायनम् इत्यादि तु पत्रलेखनेनैव साध्यते । कदाचिदस्माकं भावानां हठान्मुखतः प्रकटीकरणे त्वनभीष्टाः प्रसङ्गाः उत्पद्येरन् । परन्तु सम्यगालोच्य सावधानं पत्रे लिखिते तु तादृशानां प्रसङ्गानाम् उद्भवस्य अवकाशो न्यूनीभवति ।

अद्यत्वे भारतीयाः संस्कृतं प्रति अधिकतरम् आकृष्टाः भवन्तः दृश्यन्ते । संस्कृतेनैव सम्भाषणं चिकीर्षन्ति । परन्तु संस्कृतेन निरर्गलं सम्भाषमाणानामपि जनानां मध्ये, सरलेन उन्नतस्तरीयेण शुद्धेन प्रसन्नेन च संस्कृतेन पत्रलेखनं कुर्वाणा जनाः विरलाः । परम्परीणया पद्धत्या अधीतसंस्कृतानां जनानां पत्रेण व्यवहारः अतीवसुलभ इति केचन भावयन्ति । परन्तु तादृशेष्वपि पण्डितेषु परिणामकारिण्या सुलभया प्रसादगुणयुक्तया च भाषया पत्राणि लिखन्तो जना विरला एव । पत्रलेखनं नाम काचित् कला । अभ्यासेनैव कलेयं सिध्यति ।

'पत्रसंस्कृतम्' इत्याख्यं विचित्रं, प्रसिद्धात् संस्कृताद् भिन्नं च अपरं संस्कृतमस्तीति कोऽपि न भ्राम्येत् । अस्माकं परिचित-तमस्यैव संस्कृतस्य पञ्चीकरणरूपं सम्पर्कसाधनरूपं च शरीरमिदम् ।

पत्रलेखनविषये ज्ञातव्याः अंशाः

पत्रलेखनाय मनोहरं श्वेतं कर्गजमुपयोज्यम् । यथा शुद्धानां मनोहराणां च वस्त्राणां धारणं व्यावहारिके जीवने आवश्यकं तथा मनोज्ञानां कर्गजानाम् उपयोगः पत्रलेखने आवश्यकः । अधिकारिणः प्रायशः बहु कार्यव्यग्रा वर्तन्ते । शतशः पत्राणि प्रतिदिनं तेषामवधानम् आक्रष्टुं प्रयतन्ते । यत् पत्रं दर्शनसुन्दरम् उत्कृष्टे कर्गजे च लिखितं तस्मिन् पत्रे तेषां दृष्टिः झटिति निपततीत्येतत् सहजम् ।

कर्गजस्य चतुर्ष्वपि भागेषु प्रान्तभागः (Margin) त्यक्तव्यः । एतेन पत्राणि सुन्दराणि भवन्ति । सुवाच्यानि अक्षराणि पत्राणां नितरामपेक्ष्यमाणो गुणाः ।

पत्राणामूर्ध्वभागे (मध्येऽथवा दक्षिणपार्श्वे) पत्रलेखकानां नाम, सङ्केतः ततश्च लेखनदिनाङ्कः एवं त्रयोंऽशाः पूरणीयाः । एतेन पत्रवाचकानां मनसि-पत्रलेखकः जनः कः, कस्मात् स्थलात् पत्रमागतं, कदा पत्रं लिखितमित्येते विचाराः स्पष्टायन्ते । ततः [illegible] सम्बोध्यस्य जनस्य नाम लेखनीयम् ।

[illegible] नुसारेण 'श्रीमन्, श्रीमति, आर्य, [illegible], सुहृत्, श्रीचरण' - इत्यादि शब्दानाम् [illegible] । [illegible] सम्बोधकस्य सम्बोध्यस्य च जनस्य मध्ये [illegible], सम्बोधकजने वर्तमानः सम्बोध्य-

जनविषयकः आदरश्च प्रकटीभवति । अधिकृतेषु पत्रेषु सम्बोध्यस्य जनस्य उद्योगबिरुदम् (पदनाम=Designation) अवश्यं लेखनीयम् । उद्योगबिरुदेन सह नाम्नः अपि उल्लेखः यदि करणीयः, प्रथमतः नाम लिखित्वा तदनन्तरमेव उद्योगबिरुदं लेखनीयम् । अयं क्रमः कदाऽपि न विस्मरणीयः ।

वैयक्तिकानां पत्राणां प्रारम्भः प्रायेण क्षेमसूचनया भवति । ततः प्रतिपाद्ये विषये प्रवेशः करणीयः । साम्प्रदायिकेषु पत्रेष्वयमेव आचारः । यदि पत्रं सम्बोध्येन जनेन लिखितस्य पत्रस्य प्रत्युत्तररूपं भवेत्, 'अमुकदिनाङ्कितं भवदीयं पत्रं प्राप्तम्' इति निर्देशनमवश्यं करणीयम् । एतेन सम्बोध्यजनेन पत्रद्वारा प्रारब्धस्य विचारस्य अनुवर्तनमेतदिति विस्पष्टं ज्ञातुं शक्यते ।

स्पष्टा भाषा, लघूनि वाक्यानि, हृदिस्पृंशि वचनानि, भावप्रकटने गाम्भीर्यम् इत्यादयः पत्राणां गुणाः । अशुद्धा भाषा, अपेक्षित-विषय-विवरणमध्ये असम्बद्धानां विषयाणां प्रवेशनं, भावोद्वेगसङ्कीर्णानि वाक्यानि इत्यादयस्तु दोषाः। झटिति विषय-ज्ञापने योग्यं प्रसादगुणयुक्तं संस्कृतं प्रयोक्तव्यम् । सन्धिप्रयोगः विकल्पेन करणीयः । सन्धीनां वैकल्पिकत्वं प्राचीनानां वैयाकरणानाम् अनुमतमेव । समासाः यथाऽल्पाः तथा साधु । कदाचित् समासे कृतेऽर्थावबोधः किञ्चिदिव असुलभः भवति । अ-कृते च समासेऽर्थावबोधः समञ्जसायते । उदा- 'मया दत्तपुस्तकम्' इति प्रयोगस्यापेक्षया 'मया दत्तं पुस्तकम्' इति प्रयोगः स्पष्टतरः ।

पत्राणां समाप्तिः अन्तिमप्रणामेन करणीया । अयमन्तिमः प्रणामः-

इति तावकः / तावकी / तावकीनः / तावकीना / भावत्कः / भावत्का / भवदीयः / भवदीया' - इत्यादि शब्दानां योजनेन सम्पादनीयः ।

पत्रलेखनसमाप्तेरनन्तरं यदि अपरः कश्चनांशः संयोज्य इति स्फुरति तदा **उ.सू.** (उत्तरसूचनम्=Post Script) इति अक्षरयोः लेखनान्तरं तादृशोंऽशः पूरणीयः । उदा-

उ.सू. अहं सप्ताहानन्तरं दिल्लीं गमिष्यामि ।

सङ्केतलेखने त्ववधानमपेक्षितम् । प्रमादेन सङ्केतलेखनं पत्रप्राप्तौ विलम्बस्य कारणीभवति । व्यावहारिकेषु अधिकृतेषु वा पत्रेषु कार्यालयस्य विभागः (Department) पत्रावरणे अवश्यं सूचनीयः । अन्यथा प्राप्यं विभागं प्रति पत्रस्य प्राप्तिः अतीव विलम्बायते ।

कोऽपि जनः स्वानाम्नः विकारं न सहते । तस्मान्नामलेखनेऽपि अत्यन्तं जागरूकता आवश्यकी ।

भाषाविषये किञ्चित् अवश्यम् अवधेयम् । पत्रलेखनाय उपयुज्यमानं संस्कृतं सरलं स्यादिति सत्यं; परन्तु सरलमिति शब्दस्य 'दोषभूयिष्ठा भाषा' इति अर्थः न भवति । तस्मात् यद्वा तद्वा लिखित्वा 'सरला भाषा मया प्रयुक्ता' इति गर्वं प्राप्तुं कोऽपि जनः न शक्नोति । वैयक्तिकेषु पत्रेषु कदाचित् भाषादोषः क्षमार्हः स्यात् । (यदि सम्बोध्यो जनः क्षाम्यति ।) परन्तु अधिकृतेषु कार्यालयादि-व्यवहारसम्बद्धेषु पत्रेषु कदाऽपि भाषादोषः क्षमार्हः न भवति । तस्मात् कारणात् पत्रपेटिकायां अधिकृतस्य पत्रस्य प्रक्षेपणात् प्राक्, केचन विचाराः सम्यक् परिशीलनीयाः:-

१. सुस्पष्टा शुद्धा च भाषा प्रयुक्ता किम् ?

२. सम्बोधनेन जनेन सम्बोध्यं जनं यद् ज्ञापयितुम् अभिलषितमस्ति - तत् सम्बोध्यः जनः पत्रपठनान्तरं विना संशयं ज्ञातुं शक्नोति किम् ?

३. कोऽपि मुख्यः अंशः न त्यक्तः किम् ?

४. विषयसम्बन्धहीनम् अस्तव्यस्तं सम्बोध्यजनस्य अवधानं मुख्यात् ज्ञातव्यांशात् अन्यत्र आकर्षत् च अनावश्यकं वाक्यकदम्बकं पत्रे नास्ति वा ?

५. लेखनार्थं मनोरमं (कर्गजं) कागदम् उपयोजितं वा ?

अधिकृतस्य पत्रस्य लेखनात् प्राक् अभ्यासार्थं यथा प्राग्रूपं (Rough Copy) क्रियते तथा साधु । प्राग्रूपे आवश्यकान् लोपान् आगमान् आदेशांश्च कृत्वा तदनन्तरं तत्साहय्येन शुद्धा पत्रप्रतिः करणीया ।

****

लिखितानां पत्राणां सङ्ग्रहः अत्यन्तम् आवश्यकः । अस्मभ्यं लिखितानां पत्राणाम् अवलोकनेन वयम् अस्माकं पूर्वकालिकीः घटनाः स्मरामः, तल्लीनाः भवामः, यदि सत्यमुच्यते पूर्वस्मिन् काले कृत-पदम् इव आत्मानम् अनुभवामः । व्यावहारिके तु क्षेत्रे लिखितानां पत्राणां रक्षणं विना कस्यापि कार्यस्य निर्वाहः न शक्यते । तस्मात् मुख्यानां पत्राणां गोपनं (= रक्षणं) करणीयमेव ।

वैयक्तिकानि पत्राणि

१. विराम-प्रार्थना (१)

दिनाङ्कः............

सन्मान्य मुख्योपाध्याय !

अहं नवमकक्ष्यायां 'सि' विभागे विद्यार्थी । मम अग्रजायाः आरोग्यं प्रतिकूलं जातम् । सा विषमशीतज्वरेण आक्रान्ता । साऽधुना चिकित्सालयं प्रापिता । मम मातापितरौ दूरे ग्रामे वसतः । अग्रजायाः आरोग्यम् अवेक्षितुं कोऽप्यन्यः अस्मद्गृहे नास्ति । सप्ताहपर्यन्तं तया चिकित्सालये वर्तितव्यं भवति । तस्मादहं विज्ञापये भवन्तं कृपया सप्ताहपर्यन्तं विरामं दत्वाऽहम् अनुग्राह्य इति ।

सधन्यवादं

भावत्कः

वेङ्कटेश्वरः ।

२. विराम-प्रार्थना (२)

सन्मान्ये मुख्योपाध्याये !

अहम् अष्टमकक्ष्यायां 'बि' विभागे विद्यार्थिनी । परह्यः अहं यदा शालाम् आगच्छन्ती आसं, तदा कश्चन द्विचक्रिकाचालकः माम् अवाघट्टयत् । हठादहं भूमौ न्यपतम् । जान्वोः व्रणाः सञ्जाताः । सः चालकः आतङ्केन स्वयमेव मां गृहं प्रापयत् । पादयोः तीव्रायाः वेदनायाः कारणात् द्विदिने यावत् शालाम् उपस्थातुं

नाशक्नवम् (=I could not attend)। कृपया ते द्वे दिने (परह्यः ह्यश्च) मम अनुपस्थितिं विराम-निमित्तकां परिगणयितुं प्रार्थये।

सधन्यवादं

भवदीया

अनुरूपा

३. विराम-प्रार्थना (३)

सन्मान्य संस्कृताध्यापक !

श्वः आरभ्य त्रिदिनपर्यन्तं हैदराबाद् नगरस्य विश्वेश्वरक्रीडाङ्गणे अन्ताराज्यस्तरीया खो-खो प्रतियोगिता भवति। तत्र कर्णाटकम् अहं प्रतिनिदधामि। तस्मात् कारणात् कृपया तानि त्रीणि दिनानि मह्यम् उपस्थितिः (attendance) दातव्येति विज्ञापयामि।

सधन्यवादं

भवदीयः विधेयः छात्रः

मोहनः।

४. वर्धापनम् अभिनन्दनम्

मथुरानाथः, नवदिल्ली

अनन्तकृष्णः, उज्जयिनी।

आर्य ! स्वस्ति।

मथुरानाथनामकोऽहं भवतः कथानाम् आराधकः। अद्य प्रातः भवतः संस्कृतकथागुच्छरचनायै राज्यप्रशस्तिः लब्धेति ज्ञात्वा, स्वयं

मह्यमेव प्रशस्तिं लब्धां भावयित्वा आनन्दतुन्दिलो जातः । अस्मिन् प्रसङ्गे भवन्तं वर्धापयामि ।

आर्य ! भवतः कथासु जीवनस्य वास्तविकी छटा, वर्णमयाः सङ्घर्षाः, जीविकायै आयोधनं-सर्वमेतत् हृदयङ्गमेन आकारेण पाठकानां पुरस्तात् स्फुरति । अहं तु भवतः साहित्यसृष्टेः वैभवं दृष्ट्वा बहुवारं विस्मितोऽस्मि । केन मार्गेण भवतः एतादृशानि वस्तूनि लभ्यन्त इति च तर्कान् करोमि ।

अस्तु; पुनः भवन्तम् अभिनन्दन् इदमेव आशासे भवतः राष्ट्रप्रशस्तिरपि नचिरात् लभ्येत इति ।

पुनश्च साभिनन्दनं भवतः साहित्यस्य भक्तः

मथुरानाथः

८. प्रेषितस्य उपायनस्य विषये कृतज्ञताप्रकटनम्

कौशिकः, कन्याकुमारी

नागेन्द्रः, धर्मस्थलम्

प्रिय, स्निग्ध !

उत्सवे यद्यपि त्वम् अनुपस्थितः, तथापि अहं त्वया प्रेषितम् उपायनं (presentation) दृष्ट्वा अत्यन्तं हृष्टो जातः । उपायनमेतत् अतीव रम्यं मम अभिरुच्यै च सदृशम् । मम एतादृशे एव वस्तुनि अभिरुचिरस्तीति कथं त्वया ज्ञातमिति मम आश्चर्यमेवाभूत् । भृशम् उपकृतोऽस्मि भवता । धन्यवादाः ।

कार्यालये तव कर्तव्यभारो महान् । तस्मात् कारणाद् विरामप्राप्तिर्न सुलभा । उत्सवं प्रति तव अनागमने एतदेव मुख्यो हेतुः । एतदवश्यं जानामि । तथाऽपि तव अनुपस्थितिः मयि किञ्चिदिव वैरस्यम् अजनयत् । किं करवाम ? अस्माकम् इच्छानुसारेण विश्वस्मिन् किमपि न घटते ।

लक्ष्मणः कुशली वा ? तस्मै मम नमस्कारान् ज्ञापय ।

इति, सकार्तज्ञ्यं तावकीनः
कौशिकः

६. अभिनन्दनम्

सखि चन्दनमाले,

त्वं सर्वोच्चायां प्रथमश्रेण्याम् उत्तीर्णेति ज्ञात्वा अतीव आनन्दः समजनि । हार्दानि अभिनन्दनानि ।

अग्रे किं कर्तव्यमिति चिन्तयसि ? यदि मम सूचनां समीचीनां मन्यसे, अर्थशास्त्रे M.A. पदव्यै यतस्व । प्रथमतः, तस्मिन् शास्त्रे त्वं कृताभिरुचिः । द्वितीयतः तस्मिन् शास्त्रे विद्यार्थिनः अद्यत्वे अधिकाः, तस्मात् विद्यालयेषु शास्त्रस्यास्य व्याख्यातारः अधिकाधिकम् अपेक्ष्यन्ते ।

अहं वैयक्तिकाय कर्मणे मध्यप्रदेशं जिगमिषामि । निवर्तनान्तरं त्वां पश्यामि ।

इति सस्नेहं त्वदीया
हेमलीला

७. अनुत्तीर्णाय मित्राय मनःसमाधानार्थम् अधिकतराध्ययनाय प्रोत्साहार्थं च पत्रम्

गोविन्दस्वामिन्,

ह्यः वार्ता ज्ञाता। जयरामः आगतः आसीत्। परीक्षायां तव अनुत्तीर्णता नाम नूनं खेदकरः उदन्तः। एषः मया न प्रतीक्षितः।

किन्तु मया, सम्यग् ज्ञातं, त्वं न ह्यलसः। परन्तु शक्तिम् अतिक्रम्य अपि त्वं प्रायतथाः। सौलभ्यस्य अथवा कष्टस्य दृष्ट्या परीक्षास्वरूपम् एतादृशमेव भवतीति वक्तुं केनापि न शक्यते। ऐषमः (= अस्मिन् वर्षे) परीक्षा अत्यन्तं कष्टा आसीदिति बहवः विद्यार्थिनः माम् अब्रुवन्।

अस्तु। यत् अभूत् तदभूदेव। अत्यन्तं दुःखी मा भव। आगामिन्यां परीक्षायां त्वं प्रथमश्रेण्यामेव उत्तीर्णो भविष्यसीति विश्वसिमि। श्रद्धया हठेन च यदि त्वं पठनं पुनरारभसे, मम विश्वासः नूनमेव वास्तविकम् आकारं प्राप्नोति। तादृशं कालं निर्माहि। प्रथमश्रेण्याम् उत्तीर्णस्य तव प्रमुदितमुख-दर्शन-भाग्यं मम भूयादित्याशासे।

इति सस्नेहं तावकः

गोपालः

८. विरसताम् अनुभवते मित्राय उत्तेजनार्थं पत्रम्

सखे ! माधवस्वामिन् !

तव मनसि अद्यत्वे सर्वेष्वपि विषयेषु महद् वैरस्यं सञ्जातमिति रामस्वामिनः पत्राद् ज्ञातम्।

त्वं सङ्गीते कुशलः । परन्तु सङ्गीतकं (Music performance) दातुं कुत्रापि अवसरो न लब्ध इति खलु तव मानसिकस्य वैरस्यस्य निदानम् । अस्मिन् विषये मया काश्चन सूचनाः दीयन्ते । ताः सम्यक् चिन्तयित्वा करणीयस्य विषये चिन्तनम् आरभस्व ।

प्रथमतस्तावत् सङ्गीताभ्यासं प्रत्यहं श्रद्धया त्वं कुर्वाणोऽसीति तव परिचितानां सर्वेषामपि ज्ञातम् । केवलं सङ्गीताभ्यासेन न अलम् । रसिकानां मनांसि आक्रष्टुम् आवश्यकं सौष्ठवं त्वदीये सङ्गीते अस्ति वेति सम्यग् ज्ञातव्यम् ।

एतदपि न पर्याप्तम् । विदुषां / विदुषीणां च सङ्गीतकानि यावच्छक्यं श्रोतव्यानि । ततः विद्वांसः विदुष्यः च परिचये स्थापनीयाः । तैः / ताभिः प्रत्यहं सङ्गीतज्ञानाभिवृद्ध्यै किं क्रियत इति विचारो वेदितव्यः ।

सङ्गीतकार्यक्रमायोजकाः अपि उपसर्पणीयाः, ततः तेषां सविधे स्वपरिचयो विनयेन विनिवेदयितव्यः ।

सङ्गीतकाय अवसरे लब्धे सः अवसरः सर्वात्मना उपयोक्तव्यः। एतैः कृतैरेव सङ्गीतप्रपञ्चेऽत्यधिकाः सिद्धीः प्राप्तुं शक्नोषि ।

सङ्गीतप्रपञ्चे अग्रे सर्तुं भावुकतया साकं (with sentimentality) व्यावहारिकाः अपि केचन प्रयत्ना आरब्धव्याः । तव सङ्गीततपस्या गम्भीरेति अहं नूनं वेद्मि । तपस्यया साकं लोकोचिताः काश्चन क्रियाः अपि आवश्यक्यः इत्येतदेव मया सूच्यते ।

मया सूचिता इमाः सूचनास्त्वया अनुष्ठीयन्ते, सङ्गीतकं दातुं बहवोऽवकाशास्त्वया लभ्यन्ते च इति हृदाऽहम् आशासे ।

अन्ते त्विदं मा विस्मर -

‘विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ।’

इति साशीर्वादं
पितृव्या ।

९. वैयक्तिकं पत्रम्

आर्य! मातुल, स्वस्ति ।

अहमत्र कुशली । भवन्तमपि कुशलिनं भावये । मम गृहं परितः रोपणाय केषाञ्चन उद्भिज्जानां, (= plants) पक्काः काष्ठाः प्रेषणीयाः इति मम विज्ञापनानुसारेण भवान् मासद्वयात् पूर्वं काश्चन काष्ठाः सुरेशद्वारा मां खलु प्रापयत् । प्राप्त्यनुपदं ताः अहं गृहं परितः रोपितवान् । रोपणे यद्यपि नाहं कुशलः तथापि मया रोपिताः सर्वेऽपि उद्भिज्जाः सम्यगेव अङ्कुरिताः, पल्लविताश्च । केषाञ्चन पर्णान्येव मनोहराणि । पुष्पितेषु तु तेषु अधिकतरा शोभा जायत इति किं वक्तव्यम् । अहं तु ‘कदा ते पुष्प्यन्ति, कदा च सुरभिः मारुतः आघ्राणसुलभो भवति, कदा वा रम्यरम्याणां पुष्पाणां सौन्दर्यं गृहस्य शोभां वर्धयति’ इति स्वप्नान् रचयामि ।

अत्रानागतस्य भवतः कियान् समयः अतीतः ! शारदायाः विवाहप्रसङ्गे भवान् आगतः । ततः कदाऽपि न । आगच्छतु भवान्

कृपया एकवारम् । आगामिनि भानुवासरे वयं सर्वे कुटुम्बवर्गीयाः श्रीरङ्गपट्टनं जिगमिषामः । अस्माभिः सह भवान् यदि मिलति, सन्तोषस्य नः परा काष्ठा भविष्यति । अवश्यमागच्छतु ।

सनमस्कारं भावत्कः

अनन्तस्वामी

१०. आरोग्यवार्ताविषये

पूज्य पितृव्य,

अद्यत्वे भवतः आरोग्यं प्रतिकूलमिति मुद्गल-लिखितेन पत्रेण ज्ञातम् । एतदर्थं भृशं विषीदामि । परन्तु निपुणतरेण वैद्येन भवान् चिकित्स्यमानोऽस्ति इतीदं मनःसमाधानं किञ्चिदिव विदधाति ।

अधुनैव तत्रागत्य भवतः पार्श्वे उपविशेयमिति मम मनसि महदेव औत्कट्यम् । परन्तु श्वः परीक्षा आरभ्यते । किं करवाणि?

आशासे भवान् शीघ्रम् उल्लाघः (convalescent) भूयात् । भवतः आरोग्यपूर्णं मुखं परीक्षानन्तरं पश्येयम् । अत्रैव मयि स्थितेऽपि मम हृदयं तव हृदयेनैव मिलितमस्ति । यदि शक्यते, कृपया भवतः अधुना स्थितेर्विषये पत्रं लेखयतु ।

इति सवन्दनं

भवदीयः

के. विजयः

११. वसतिगृहस्य दुरवस्थाविषये निवेदनम्

शिवराय धर्मशाला,
वाणीविलासः, नवदिल्ली

आदरणीय पितृवर्य! नमस्ते ।

ग्रामात् यदाऽहं दिल्लीनगरम् आगतवान् तदा मम मनसि बहवः स्वप्नाः आसन् । नवदिल्ली तु राजधानी, राष्ट्रस्य अन्यप्रदेशापेक्षया अत्र अधिकतरम् आनुकूल्यं भवति; तस्मात् कारणात् वसतिसौकर्यं लब्धुं मम कोऽपि क्लेशो नात्र जायते इत्यादिकं स्वप्नसौधमेव मनोभूमौ निर्माय दिल्ल्यां पदं न्यधाम् । किन्तु अत्र सम्भूता घटना त्वन्या ।

शिवरायधर्मशालानाम्नि वसतिगृहे (hostel) मम स्थलावकाशो लब्धः । धर्मशालाध्यक्षः तावद् धनं अपेक्षितवान् यावत् मयि विद्यमानस्य अर्धम् । प्रातः प्रातराशः, मध्याह्ने सायं च भोजनं, प्रातराशानन्तरं सायं च काफी, प्रतिभानुवासरं च विशिष्टं किमपि मधुरं भक्ष्यम् इतीदृशो नियमः अत्रास्ति । परन्त्वेषः न सम्यक् अनुष्ठीयते । रात्रौ भोजनं तु सप्ताहे केवलं त्रिदिनान्येव । अन्नाय उपयुज्यमानः तण्डुलः निम्नस्तरीयः । तत्र पाषाणखण्डाः, केशाः, मृत् च गोचरीभवन्ति । भानुवासरेषु परिवेष्यमाणं 'मिष्टं' भक्ष्यं तु केनापि कुत्सितेन तैलेन मिश्रितं सत्-निर्वमनं (=Vomit) कारयति । प्रातराशस्तु पशूनां सदृशो न तु मनुष्याणाम् । एतद्विषये यदि विचारणा क्रियते 'त्वं निर्गच्छ' (get out) -इति गर्जन्ति अत्रत्या अधिकारिणः ।

अत्र नातिदूरे 'सुधीवसतिगृहम्' अस्ति । तत्राहारादिव्यवस्था तृप्तिकरी वर्तते । किन्तु शुल्कं किञ्चिदधिकतरम् । अहं श्वः एव तत्र

गन्तास्मि । अधिकशुल्कार्थं कृपया पञ्चाशत् रूप्यकाणि धनादेशद्वारा सुधीवसतिगृहस्य सङ्केतं प्रति प्रेषणीयानीति प्रार्थये ।

इति सप्रीति सनमस्कारं च, भवदीयः प्रियपुत्रः
के.वि. नायकः

१२. गृहसङ्केतज्ञापनार्थं विज्ञप्तिः

१३, पुरनाट्टुकरा, मण्डपवीथी, केरलम्

आर्य! स्वस्ति ।

भवान् अन्यद् गृहं गतवानिति ज्ञातम् । ह्यः अहं भवतः पूर्वतनं गृहं गतवान् । तत्र विषयो ज्ञातः । किन्तु नूतनगृहस्य सङ्केतः न लब्धः । तस्मात् कार्यालयसङ्केताय पत्रमिदं प्रेष्यते । अत्यन्तं मुख्यः कश्चन विषयः भवता चर्चनीयोऽस्ति । कृपया नूतनगृहसङ्केतं ज्ञापयित्वा, कदा भवतः अवकाशो लभ्यत इत्यपि पत्रद्वारा सूचयतु । एतन्मा विस्मरतु ।

धन्यवादैः साकं, भावत्कः सखा,
कुमारचन्द्रः

१३. वर्धापनम् अभिनन्दनम् (२)

बोगादि, ६५, मैसूरु

मातामहचरणाः ! स्वस्ति ।

तत्रभवतां[१] (=पूज्यानां) पौत्रेण विनायकेन मया पूज्यानाम् अशीतितमजयन्तीमहोत्सवे शिरसाऽष्टाङ्गनमस्कारो विधीयते ।

१. तत्रभवान्, अत्रभवान् (पुं), तत्रभवती, अत्रभवती (स्त्री) इति पदचतुष्टयम् आदरणीयान् पूज्यजनान् निर्दिशति । एतस्य प्रयोगानन्तरं पुनः भवच्छब्दस्य प्रयोगोऽनावश्यकः ।

तत्रभवन्तः अशीतिसंवत्सरान् जीवने यापयित्वा एकाशीतितमे वत्सरे पदं निदधतीति पूज्यैः पितृचरणैः श्रुत्वाऽहम् आनन्दतुन्दिल एव सञ्जातः। अस्मिन् मङ्गलप्रसङ्गे हार्दानि अभिनन्दनानि ! यद्यपि जयन्त्युत्सवे साक्षात् मया भागं ग्रहीतुं न शक्यते विरामाभावात्, तथाऽपि उत्सवे गृहीतभाग इव सन्तोषप्रकर्षं विन्दामि।

पूज्यैः पितृचरणैः तत्रभवताम् अ-कृत-स्मरणं दिनमेव नास्ति। पितृचरणानां बाल्यकाले तत्पालनार्थं कथं कष्टानि सोढानि तत्रभवद्भिः इत्येतद्विषये बहुवारं वयं बहून् वृत्तान्तान् श्रुतवन्तः स्मः। तथा हि–

षष्टिवर्षेभ्यः प्राक् ग्रामे विद्युद्दीपः नासीत्। विद्याभ्यासव्यवस्था स्वप्नेऽपि न कल्पनीयाऽऽसीत्। भूयो भूयः महामारिकारोगस्य (plague) विषूचिकारोगस्यापि (Cholera) उपद्रवः। 'गण्डस्योपरि विस्फोटः' इति आभाणकानुसारं दारिद्र्यमपि। तादृश्यामपि परिस्थितौ कथं तत्रभवद्भिः अतीव परिश्रमेण पितृचरणानां विद्याभ्यासो दापितः, स्वकीयं जीवितम् एव कथं परोपकारार्थम् उपयोजितम् इत्यादिकं सर्वं श्रावं श्रावं तत्र- भवतां विषये अस्माकम् अभिमानः अत्यन्तम् अवर्धत।

वयं सर्वे विद्यया धनेन गौरवेण च समृद्धं यत् जीवितम् इदानीम् अनुभवामः, तत् सर्वं तत्रभवतां स्वेदस्रावकस्य श्रमस्य फलम्।

तत्रभवन्तः आरोग्यशालिनः देहदार्ढ्ययुताः सन्तः अस्मिन्नपि वयसि वर्तमानाः, स्वयं गृहं परितः यदा कदा सस्यरोपणाय खननकार्यं कुर्वन्ति इति ज्ञात्वा भृशं तुष्यामि।

आशासे तत्रभवन्तः शतं शरदः अवलोकयन्तु । आगामिनि मासे विरामं लब्धुं मया शक्यते । तदा पूज्यचरणान् साक्षात् प्रणन्तुं ग्रामम् आगमिष्यामि ।

इति सप्रणतिसाहस्रं
भावत्कः प्रियपौत्रः
विश्वासलोचनः

१४. पुस्तकप्रेषणाय विज्ञापना

११, लावण्यवीथी, मध्यप्रदेशः - ११
डिसेम्बर् २, १९९३

अयि, मोहन,

एतत् पत्रं दृष्ट्वा मन्ये तव महान् विस्मयो भवेत् । यतः ह्यः एव मया पत्रं किञ्चन लिखितमासीत् । पुनरपि त्वरितं पत्रलेखनस्य कारणं किमिति तव मनसि आतङ्कोऽपि स्थानं प्राप्नुयात् ।

पुनः पत्रलेखने हेतुरयमेव यत्त्वयि कालिदासविरचितं मालविकाग्निमित्रं यद् वर्तते, कृपया तत् प्रेष्यतामिति प्रार्थनाकरणम् । आगामिनि शनिवासरे तद्विषये चर्चागोष्ठी अस्माकं शालायाम् आयोजिता । प्रायेण एतादृशीः चर्चाः नाहं रोचये । किन्तु सतीर्थ्याः अत्र मां निरबध्नन् । तस्मान्मया चर्चायां भागः बाढं ग्रहीतव्यः ।

प्रमादवशाद् ह्यः लिखिते पत्रे विचारममुं विस्मृतवानस्मि । तव सहोदरः किल श्वः अस्माकं गृहमागच्छति, तस्य हस्ते मालविकाग्निमित्रम् अवश्यं प्रेषणीयम् । एतन्न विस्मर्तव्यम् ।

इति सस्नेहं, तावकः सखा
पावनः

१५. आह्वाने प्राप्तेऽपि अनुपस्थितिः, तद्विषये स्पष्टीकरणं च

कित्तूरुचेन्नम्मानगरं, कर्णाटकम्
मार्च् १४, १९९०

सखे गुणभानो !

अहं सम्यगेव ऊहे ह्यः तव गृहं प्रति मम अनागतत्वात् त्वयि सम्भूतं कोपम् । त्वया दत्तम् आह्वानं नाहं व्यस्मरम् । ममानागमनस्य कारणं त्विदम्–

वस्तुतस्तु अहं ह्यः प्रस्थित एव । कुमारपार्क्समीपे यदा गतवान् तदा मम चक्षुषोः अग्रे एव कश्चित् द्विचक्रिका (Motor bike) चालकः कञ्चन पान्थं समघट्टयत् । स पान्थः हठात् पतितः मूर्छितश्च । द्वित्राः तीक्ष्णाः व्रणाः अभवन् । रुधिरमपि अस्रवत् । त्वमेव जानासि कुमारपार्क्समीपे कोऽपि चिकित्सालयः नास्तीति । सः द्विचक्रिकाचालकः स्वस्य अपराधस्य प्रायश्चित्तमिव कुर्वन् पान्थं चिकित्सालयं नेतुं प्रायतत, मम साहाय्यं च प्रार्थयत । वाहनस्य पश्चाद्भागे पान्थम् उपवेशय्य, वाहनं हस्ताभ्यां प्रणुदन् (pushing) चालकः सुदूरं वर्तमानं सार्वजनिकचिकित्सालयं नीतवान् । अहमपि

तत्र गतः । दैवात् तत्र वैद्याः पान्थं शीघ्रं परीक्ष्य सर्वं करणीयम् अकुर्वन् । पान्थः संज्ञां प्रपेदे । एतेन निमित्तेन ह्यः तव गृहम् आगन्तुं नाशक्नवम् । कृपया क्षमस्व ।

इति, स-विश्वासं
भवदीयः सुहृत्
चन्द्रनारायणः

१६. स्नेहपत्रम्

३२५, अग्रहारः, पाठशालासमीपम्, मैसूरु
फेब्रुवरी ४, १९९५

सखे रामकृष्ण! स्वस्ति ।

भूयान् समयोऽतीतो दृष्टस्य तव । त्वं कीदृशोऽसि, सोद्योगो वा निरुद्योगो वा किमपि न ज्ञायते । आशासे भवान् सोद्योग इति ।

अहमधुना कस्याञ्चन संस्थायां गणकयन्त्रस्य (Computer) प्रचालकोऽस्मि (Operator) । अत्रत्याः सर्वे उद्योगिनः स्वकर्मसु दक्षाः स्नेहपराश्च । जीविकायै पर्याप्तं वेतनं दीयते ।

मम पितरौ सहोदरौ च कुशलिनः । वारं वारं वयं सर्वेऽपि स्मरामस्तव । अद्य प्रातः अस्माकं गृहे त्वद्विषयिका एव चर्चा समभूत् । तव क्षेमं ज्ञातुं सर्वे वयं सोत्कण्ठाः स्मः । एतत्पत्रप्राप्तिसमनन्तरं त्वया पत्रम् अविस्मृत्य लेखनीयम् । यदि च शक्यते - एकवारं दर्शनं च दत्वा अनुग्राह्या वयम् ।

इति सप्रेम,
तव प्राणसखः
स्नेहरामः

१७. स्वातन्त्र्योत्सवविषये

१३, अप्पाजीचतुष्पथः
सौधापणः, धारवाड
आगस्ट् १५, १९९४

सखि मालति !

यथा त्वं जानासि तथाऽद्य स्वातन्त्र्योत्सवदिनाचरणम् । अस्माकं शालायाम् एतद् दिनाचरणं कथमाचरितमिति विषये त्वां ज्ञापयितुमहम् इच्छामि ।

शुभ्रवस्त्रधारिणो वयं सर्वेऽपि विद्यार्थिनः अद्य प्रातः शालामगच्छाम । मुख्यातिथिः श्रीमान् गौरवमहोदयः आसीद् यः स्वातन्त्र्यायोधने त्रिवारं कारागृहवासम् अनुभूय तदानीन्तनं देशचरित्रं सम्यग् ज्ञातवान् ।

श्रीमान् गौरवमहाशयः ध्वजस्तम्भस्य अधः दोलायमानां ध्वजरज्जुं यदा आकर्षत् तदा वर्तुलरूपी ध्वजः अपावृतः । सर्वे वयं कराताडनम् अकरवाम ।

मुख्यातिथिः स्वीये भाषणे स्वातन्त्र्यशब्दस्य अर्थं विवृण्वन् स्वीयान् कांश्चन अनुभवान् मनोज्ञम् अवर्णयत् । सभायाः अध्यक्षः अस्माकं शालायाः मुख्योपाध्यायः एवासीत् । सः छात्रेभ्यः हितवचनानि उपादिशत् । वन्दनार्पणेन कार्यक्रमः समाप्तोऽभवत् ।

तव शालायां स्वातन्त्र्योत्सवः कथमाचरित इति विषये त्वयाऽपि लिख्यमानं पत्रं निरीक्षे ।

इति स-स्नेहं, तावकीना सखी
जयन्ती ।

१८. प्रवासाय आमन्त्रणम्

१३, अनन्तमार्गः, विश्वपुरम् जयरामनगरम्-७

जनवरी २, १९९२

आदरणीय शम्भुस्वामिन् !

अद्यारभ्य मम विद्यालयस्य विरामः । तस्य कारणं परीक्षायाः समाप्तिः । नगरं परितः वर्तमानायाः पर्वतपङ्क्तेः वीक्षणार्थम् अहं, तथा मम त्रिचतुराणि मित्राणि परश्वो गमिष्यामः । यद्यपि पर्वतपङ्क्तिरियं पूर्वमपि मया द्विवारं दृष्टाऽसीत्, किन्तु सदा मया साकं मम मित्राणि नागतवन्ति आसन् । अधुना तु मित्रैः साकं तत्र जिगमिषतो मम परिभोगः (= ಮಜಾ) एवान्यः ।

अवसरेऽस्मिन् भवतोऽपि अस्माभिः सह हर्षमनुभूयमानम् अहमभिलषामि । यथा भवान् जानाति तथा पूर्वं द्विवारमपि मया साकं हर्षप्रकर्षम् अनुभवितुं तव शक्यं नाभूत्, अन्यत्र अवश्यं गन्तव्यत्वात् । अधुना भवन्तं त्यक्तुं नाहं सिद्धोऽस्मि । तव मधुरं गानं, कथाकथने कौशलं, विनोदकणिकानां झटिति स्फूर्त्या निर्माणे चातुर्यं च मम मित्रेभ्यः परिचाययितुं बलवदस्मि कुतूहली । अवश्यमिदानीम् अस्माभिः सार्धं भवान् पर्वतपङ्क्तौ निसर्गसौन्दर्यम् आस्वादयिष्यत्येवेति आशासानः[१] ।

भवदीयः

अनन्तनारायणः

---

१. 'आशासानः' इति पदं 'भवदीयः' तथा 'अनन्तनारायणः' इति पदयोः साक्षात् अन्वेति । तस्मात् अत्र 'इति सस्नेहम्' इत्यादिपदानाम् अवसरः नास्ति ।

१९. मातरं प्रति पुत्र्याः पत्रम्

सरस्वतीविद्यामन्दिरम्
जयलक्ष्मीपुरम्, मैसूरु
मार्च् १४, १९९३

पूज्ये अम्ब,

अहमत्र कुशलिनी । भवतीमपि कुशलिनीं भावये । यथा सप्ताहात् पूर्वं मया लिखितं तथा परीक्षा अस्यैव मासस्य अष्टादशदिनतः आरप्स्यते ।

यद्यपि परीक्षायाः विचारे मम काऽपि भीतिर्नास्ति, तथापि गणितस्य परीक्षा किञ्चिदिव कष्टा स्यादिति मन्ये । अस्माकं शालायां गणितविषयेऽत्यन्तं मेधाविन्यः काश्चन शिष्याः सन्ति । तेषां ममात्यन्तं प्रियसखी नलिनाक्षी अन्यतमा । सा च सहजेन सौजन्येन मम साहाय्यं कर्तुम् अङ्गीकृतवती । अद्यप्रभृति प्रतिदिनं गणितस्य क्लिष्टाः समस्याः परिहर्तुम् अहं ताम् आश्रयामि ।

कदाचिन्मया चिन्त्यते-किमर्थं परीक्षानाम्नी पिशाचिकाऽस्माकं रक्तं चूषतीति । कदा वा परीक्षा समाप्तिं गच्छति, कदा वा विरामो लभ्यते, कदा च वाऽहं भवत्याः वात्सल्यपूर्णं मुखं पुनः पश्यामि इति उत्कण्ठा मां बाधते ।

पूज्याय पितृचरणाय मम प्रणतयो निवेद्याः ।
इति स-नमस्कारं भवत्याः प्रियपुत्री
वासवदत्ता

२०. पितरं प्रति पुत्र्याः पत्रम्

पूज्य पितृचरण ! वन्दनानि ।

वयं सर्वेऽत्र कुशलिन इति निवेदयितुं, तथा भवान् दिल्ल्यां कस्यां परिस्थित्यां वर्तत इति ज्ञातुं च इदं पत्रमधुना लिख्यते ।

मासद्वयं गतं दिल्लीं गतस्य भवतः । यद्यपि कार्यालयकर्तव्य-निमित्तकमेव (=O.D) भवदीयं तत्र गमनम्, तथापि भवता रहितं, गृहं शून्य-शून्यमिव प्रतिभाति । प्रतिसप्ताहम् एकवारं भवल्लिख्य-मानानि पत्राणि तु किञ्चिदिव मनःसमाधानम् उत्पादयन्ति । एकमासात् प्राक् लिखिते पत्रे भवता आगामिनः मासस्य पञ्चदशादिनाङ्के प्रतिनिवर्तनं सूचितमासीत् । परन्तु अद्य प्रातः लिखितेन पत्रेण भवतः कर्तव्यशेषोऽधिकः अस्तीति, तस्मात् कारणात् तव प्रतिनिवर्तनं त्रिमासपर्यन्तं व्याक्षिप्तमिति (postponed) च ज्ञात्वा जातां निराशां दुर्बलैः शब्दैः वर्णयितुं न शक्नुमः ।

सहोदरी उषा तु भवतः वियोगम् असहमाना म्लानम्लाना जाता । सनिर्बन्धं भोजनं तया कारयितव्यं भवति । नक्तं (=night) तु प्रायेण उपवसति (fasts) ।

भवतः सदा हसन्मुखिता, पुत्रीभ्याम् आवाभ्यां विनोदशीलता, मात्रा सह हास्यकोलाहलोत्सवः, सर्वमेतत् स्मारं स्मारं नितरां वयं दूयामहे । माता यद्यपि वदनम् अपावृत्य किमपि न वदति, तथापि तस्याः मुखं-भवता सहितेषु दिनेष्विव-न उल्लसति ।

परन्तु माता पुनः पुनः पठने मनः आधातुम् आवाम् उपदिशति । कथयति च– 'यदि युवां परीक्षाविषये औदासीन्यं

प्राप्नुथः, अनुत्तीर्णे भवथः । प्रतिनिवर्तिष्यमाणस्य पितुः एतादृशी वार्ता यथा स्वागतं न करोति, तथा आचरितव्यं युवाभ्याम्' ।

सत्यं वदति माता । द्वे अपि आवां प्रतिज्ञां कृतवत्यौ - यत् प्रतिनिवर्तिष्यमाणस्य भवतः श्रवणयोः आवयोः प्रथमश्रेण्यां उत्तीर्णतावार्ता यथा स्वागतं करोति तथा करवाव ।

इति स-प्रणामसाहस्रं भवदीया
प्रियपुत्री
जानकी

२१. अनारोग्यस्य ज्ञापनम्

पूज्ये, अम्ब !

मम आरोग्यस्य विषये भवती अत्यन्तं चिन्तामग्नेति सहोदरलिखितेन पत्रेण अजानम् । आतङ्कस्य विषयः कोऽपि नास्ति ।

सप्ताहात् पूर्वं सोमवासरे शरीरे विचित्रतरः श्रमः जातः । तं श्रमम् अहं न पर्यगणयम् । किन्तु मङ्गलवासरे प्रातः शय्यातः उत्थानमेव किञ्चिदिव कष्टकरम् अभवत् । तेन, ज्वरः मयि आक्रान्त इति ज्ञातवान् । शीघ्रं वैद्यवर्यं डा. पूर्णचन्द्रं सन्दृष्टवान् । सः सम्यक् मां परीक्ष्य गुलिकात्रयं प्रतिदिनं स्वीकर्तुम् असूचयत् । तेनैव प्रकारेण अहमपि तत्सूचितं गुलिकात्रयं स्वीकृतवान् । प्रथमे दिने ज्वरः पूर्ववदेव आसीत् । द्वितीये दिने अधिकाधिकः स्वेदो जातः, ज्वरो न्यूनीभूतः । तृतीये दिने ज्वरः अदृश्योऽभवत्; किन्तु श्रमः पूर्ववदासीत् । ह्यः अहं शालाम् अगच्छम्; किन्तु मुख्योपाध्यायस्य अनुमतिं लब्ध्वा मध्याह्ने गृहं प्रतिन्यवर्ते । अधुना तु उल्लाघोऽस्मि (convalescent) ।

दिनत्रयावधौ शालायां यत् प्रवचनं कृतं तस्य टिप्पण्यः मम मित्रैः लिखिताः। प्रतिलिपिकरणाय मह्यं ताः दातुं तैः अङ्गीकृतम्।

अन्यत् सर्वमपि भद्रम्। आशासे भवतीं च कुशलिनीम्।

इति स-वन्दनं भावत्कः प्रियः पुत्रः
सुन्दरनाथः

२२. उपरिनिर्दिष्टस्य पत्रस्य उत्तरम्

प्रियपुत्र सुन्दरनाथ,

.... दिनस्य त्वदीयं पत्रं प्राप्तम्। मनसि किञ्चित् समाधानं जातम्। त्वं कीदृश्यां स्थित्यां वर्तसे, आरोग्यम् अनुकूलं वा प्रतिकूलं वा, भोजनं सम्यक् करोषि वा न वा इत्येतादृशैः अनल्पैः चिन्तानिचयैः सदाऽहम् आक्रान्ता भवामि। अधुना उल्लाघोऽसीत्येतावदेव न सन्तृप्तिकारणम्। यतः प्रायेण त्वम् आरोग्य-विषये अवज्ञां (carelessness) कुरुषे। अस्तु; आरोग्यम् अवेक्षस्व। अध्ययनं सश्रद्धं कुरु। परीक्षानन्तरं विरामप्राप्ति-समनन्तरम् अत्र प्रतिष्ठस्व। तवागमनमेव अहं सदा प्रतीक्षे।

इति साशीर्वादं तावकी वात्सल्यवती
अम्बा

२३. परीक्षानुभवः

प्रिय व्रजमोहन,

परीक्षायाः अनुभवः कीदृश इति त्वं वेत्सि एव। अत्र विशिष्य किमपि न वक्तव्यम् अवशिष्यते। यतः बह्वीः परीक्षाः

अहमपि दृष्टवान्, त्वमपि । परन्तु ह्यः प्रचलिता द्वितीय पदवीपूर्व (पि.यु.सि.) परीक्षा तु पूर्वम् अननुभूतान् बहून् प्रसङ्गान् असृजत् । तद्विचारे किमपि तुभ्यं लेखनीयमेवेति उत्कटाम् आकाङ्क्षां निरोद्धुम् अहं न शक्नोमि ।

ह्यः संस्कृतमासीद् विषयः । परीक्षायाः अवधिः वादनत्रयम् । ऐषमः (this year's) परीक्षा परुत् (yester year's) (प्रथम पि.यु.सि) परीक्षायाः अपेक्षया सुलभतरा इति वक्तव्यमेव । तस्मात् कारणात् प्रश्नपत्रिकाविचारे विशेषतः किमपि उल्लेखनीयं नास्ति ।

परन्तु परीक्षाकक्ष्यायां काश्चन घटनाः अभूवन् । तद्विषये किञ्चित् ।

द्वौ विद्यार्थिनौ अतीव विलम्बेन आगतौ । पञ्चचत्वारिंशत् निमेषानन्तरं तयोः आगतत्वात् तयोः प्रवेशावकाशः निषिद्धः आसीत् । किन्तु तौ कक्ष्याधिकारिणे यदा बिभीषिकां प्रदर्शयितुं प्रारब्धवन्तौ तदा सः प्रिन्सिपाल्महाशयाय निवेदनां कृतवान् । प्रिन्सिपाल् स्वयमागत्य तौ द्वौ अपि परीक्षातः बहिरकरोत् ।

मम पार्श्वे उपविष्टा काचित् विद्यार्थिनी अग्रे उपविष्टस्य कस्यचित् विद्यार्थिनः उत्तरपत्रिकां दृष्ट्वा प्रतिलिपिं करोति स्म । कक्ष्याधिकारी एतद् दृष्ट्वा ताम् अजागरयत् । पुनः सा तथा नाकरोत् ।

किन्तु कक्ष्यायाः कोनभागे उपविष्टः विद्यार्थी पुनः पुनः स्वगोहं (pocket) वीक्षते स्म । अन्ते सत्यं किमिति ज्ञातम् । सः गोहे टिप्पणीः विरच्य तत्र आनीतवान् । सः गृहीतः । सः

किमकरोज्जानासि वा ? हठात् परीक्षाकक्ष्यामेव त्यक्त्वा पलायितः । द्वौ विद्यालयस्य सेवकौ तं द्रुतौ (=chased) । सः पुनः कक्ष्यां आनीतः । प्रिन्सिपाल्महाशयाय विचारोऽयं निवेदितः । तस्य गतिः काऽभवदिति न जाने ।

दैवात् परीक्षानामिकायाः पिशाचिकायाः भीतिः समाप्ता । इत ऊर्ध्वं द्वौ मासौ अस्माकम् अधिपाः वयमेव । चेन्नैनगरे मम पितृव्योऽस्ति । अहं श्व एव तत्र प्रस्थितोऽस्मि । पुनरागमनानन्तरं त्वया मिलामि ।

तावत् पर्यन्तं-भूयांसि नमांसि ।

इति स-हार्दं [१] भावत्कः प्रियसुहृत्

अद्भुतसागरः

२४. उपकारार्थं विज्ञप्तिः

रेवति !

अहमत्र कुशलिनी । त्वामपि कुशलिनीं भावये ।

अधुना त्वामुद्दिश्य किञ्चित् प्रार्थयितुमिदं पत्रं लिख्यते ।

महेशनामकः कश्चित् मम पितृव्यपुत्रोऽस्ति । सः ऐषमः के.पि.एस्.सी. परीक्षायाः अभ्यर्थी अस्ति । तस्य परीक्षाकेन्द्रं मैसूरु वर्तते । द्विदिनपर्यन्तं तेन तत्रैव स्थातव्यम् । अस्मिन् विषये भवतीं प्रार्थये यत् कृपया केवलं द्विदिने यावत् भवत्याः गृहे उषितुं तस्मै अवकाशो दातव्यः । एतेन भवत्याः सम्भवन्तं क्लेशं सम्यगहम् ऊहे । परन्तु गत्यन्तराभावात् एवं प्रार्थना अवश्यं करणीया आपतिता । (ಮಾಡಬೇಕಾಗಿ ಬಂದಿತು.)

---

१. हार्द प्रेम

यद्यपि मम कश्चिद् बन्धुः मैसूरुनगरेऽस्ति । किन्तु यदैव परीक्षाऽस्ति तदैव तेन स्वकार्यमुद्दिश्य दिल्लीं प्रति गन्तव्यमस्ति । तस्मान्मयाऽयं क्लेशो भवत्याः उत्पाद्यते । एतदर्थं क्षमां याचे । भवत्याः अनुमतिपत्रं निरीक्षे ।

इति त्वदीया स्निग्धा

मञ्जुलादेवी

२५. प्रत्युत्तरम्

सखि ! मञ्जुलादेवि,

भवत्याः..... दिनस्य पत्रं प्राप्तम् । विषयश्च ज्ञातः । भवत्याः पितृव्यपुत्रः ससन्तोषम् आगच्छतु, अस्मद्गृहे तस्यानुकूल्यानुसारेण च वसतु । अत्र क्लेशोत्पादनस्य प्रसङ्ग एव नोदेति । नूतनस्य कस्यचित् सख्युः परिचायनाय प्रत्युत मयैव तुभ्यं धन्यवादा निवेद्याः ।

महेशाय ज्ञापय अहं तस्य प्रतीक्षां करोमीति ।

इति सस्नेहं

तावकीना सखी रेवती

२६. तिर्यक्पथे गच्छते पुत्राय मात्रा लिखितं पत्रम्

प्रियपुत्र जगदीश,

मम मनसि तीव्रा व्याकुलता समजनि त्वां दुरभ्यासैः सङ्कीर्णं श्रुत्वा । एतस्मादपि अधिकं दुःखकृत्तरो विचारः अपरो नास्ति ।

दारक, (ஊங) त्वमेव सम्यक् स्मर मदुक्तीः, यास्तव कालेजप्रवेशप्रारम्भसमये - कथिताः । मया किमुक्तमासीत् ? ''निम्ने मार्गे गच्छद्भिः जनैः सह मा मिल'' इति खलु मयोक्तम् ? किन्तु अधुना तिर्यक्पथे कृतप्रवेशाः तव स्निग्धाः संवृत्ताः ।

माणवक, यद् घटितं तस्य स्मारणेन तव निन्दनं मम न उद्देशः। किन्तु साधुभिः सेविते मार्गे गन्तुं सूचनादानाय पत्रमेतल्लिख्यते ।

तव 'आप्ताः' वस्तुतस्तव शत्रवः । तव सभ्यं चारित्र्यं ते नाशयन्ति । त्वं मित्रैः हीनोऽपि वरं न तु नीचैर्युक्तः ।

आशासे, भाविनि काले त्वं सभ्ये पथि पदं निदधासीति ।

त्वदीयामभिवृद्धिमेव सन्ततं काङ्क्षमाणा [१]

तावकीना माता

२७. उपरिनिर्दिष्टस्य पत्रस्य प्रत्युत्तरम्

आर्ये ! अम्ब !

/ तत्रभवत्यां पूज्यायां मातरि पुत्रेण जगदीशेन क्रियमाणाः प्रणामाः समुल्लसन्तु [२] ।

तत्रभवत्याः (=पूज्यायाः) अनुग्रहलिपिः .... दिनाङ्किता प्राप्ता विषयश्च अवगतः ।

---

१. अत्र १८ सङ्ख्याङ्कितपत्रे दत्ता टिप्पणी द्रष्टव्या ।

२. यदि 'आर्ये! अम्ब' इति साक्षात् सम्बोधनं लिख्यते - 'तत्रभवत्यां..... समुल्लसन्तु' इति वाक्यस्य आवश्यकता नास्ति । 'तत्रभवत्यां...... समुल्लसन्तु' इति वाक्ये प्रयुक्ते तु 'आर्ये, अम्ब' इति सम्बोधनस्य आवश्यकता नास्ति ।

अस्मिन् विषये सविनयं निवेद्यते यदतीतं तु घटितमेव । परिस्थितेः अनिवार्येण वेगेन अहं बलवत् आकृष्टः । भाविनि काले पुनः एवं यथा न भवति तथा अहं वर्तितुं शक्तिम् अतिक्रम्यापि प्रयतिष्ये । तत् प्रचलितं, तेन भवत्याः हृदये जातम् उत्कटं दुःखम् अहं सम्यगेव वेद्मि । एतदर्थं क्षमां प्रार्थये ।

इतः अग्रे केवलं सभ्यैः मित्रैर्मिलामि, प्रशस्तमेव पन्थानम् आश्रित्य विद्यानिरतो भवामि इति प्रतिजानन् [१],

भवदीयः प्रियपुत्रः

जगदीशः

२८. ऋणदानाय प्रार्थना

अनन्तमाधव ! सस्नेहं नमस्ते ।

प्रायेण मया एतदवधि लिखितेषु पत्रेषु भवता साकं सख्यानुवर्तनमेव मतिगतमासीत् । भवता चापि मम अनुकूलान्येव पत्राणि काले लिखितानीति नूनम् अनुगृहीतोऽस्मि । परन्तु अद्य कामपि गम्भीरां समस्याम् अधिकृत्य मया निवेदनीयमस्ति । यदि पत्रमेतत् भवतो मनोवैरस्यं जनयति, कृपया क्षम्यताम् ।

भवानेव जानासि अहम् अस्माकं संस्थायां गाणनिक्यविभागे उद्योगीति । गते सोमवासरे किञ्चित् दुष्टु (=something unwanted) सञ्जातम् । गणनायाम् अस्तव्यस्तता समजनि । बहुवारं गणनायामपि यदा गणितं न शुद्धं सञ्जातं, तदा रूप्यकाणाम्

---

१. द्रष्टव्या १८ पत्रस्था टिप्पणी ।

आहृत्य (Total) मौल्यं परिशोधितम् । तदानीं ज्ञातं पञ्चसहस्रं रूप्यकाणि न्यूनानीति ।

एतत् कथमभूदिति मम ऊहादपि दूरतरम् । हृदयेनाहं परिशुद्धोऽस्मि । वञ्चनादिको दुर्व्यवहारो मम स्वप्नेऽपि स्थानं लब्धुं न शक्नोति । कस्य उद्योगिनो विषये सन्देग्धव्यम् ? यथाहं जानामि तथा अत्र वर्तमानाः सर्वेऽपि उद्योगिनः प्रामाणिकाः । एतत्तु कथमभूदिति न जानामि ।

विषयोऽयं न कस्मै अपि मया ज्ञापितः । किन्तु आगामिनि मासे यदा अधीक्षकः आगमिष्यति, तदा सर्वमपि बहिरङ्गीभवति । प्रायः अहं ग्रहीष्ये निग्रहीष्ये च । तस्मात् झटिति द्विसहस्रं रूप्यकाणि प्रेषयतु । (मम सविधेऽधुना त्रिसहस्रं रूप्यकाणि सन्ति ।) आगामिनि मासे वेतनप्राप्त्यनुपदमेव प्रतिनिवर्तयिष्यामि । भवता करिष्यमाणमिमम् उपकारं न विस्मरिष्ये । एवं क्लेशोत्पादनाय विषीदामि, क्षमां याचे च ।

इति सविश्वासं

गौराङ्गः

२९. प्रत्युत्तरं-विध्यात्मकम्

प्रियसखे गौराङ्ग !

अद्य प्रातः तव पत्रं प्राप्तम् । तव हृत्सङ्कोचः एतावान् अस्ति इति तव पत्रं दृष्ट्वैव मया ज्ञातम् ।

अयि भोः । किं त्वं मां बाह्यमिव भावयसि ? पूर्वं भवताऽनेकप्रसङ्गेषु अहं कृतसाहाय्यः । तत् स्वप्नेऽपि किं विस्मर्तुं शक्नोमि ?

मा चिन्तातुरो भव । अहमधुना तव सविधे त्वया सूचितया रीत्या रूप्यकाणां सहस्रद्वयं प्रेषयामि । यदि अधिकम् आवश्यकं, तदपि निवेदय, प्रेष्यते ।

एतादृशेषु किल प्रसङ्गेषु मनुष्यत्वमिति शब्दस्य वास्तविकोऽर्थः स्पष्टीभवति । यद्यहं तव किमपि साहाय्यं नाचरामि, आवयोः मैत्र्याः वा किं फलम् ? अस्तु, यदा मम साहाय्यम् अपेक्ष्यते तदा पत्रं लिखितुं विकाङ्क्षां (Hesitation) मा कुरु ।

इति सविश्वासं

अनन्तमाधवः

३०. प्रत्युत्तरं-निषेधात्मकम्

प्रियमित्र गौराङ्ग,

अहं त्वदीयं पत्रं प्राप्तवानस्मि । विषयं च अवगतवानस्मि ।

तुभ्यं द्विसहस्रं रूप्यकाणि प्रेषयितुं यद्यहम् अशक्ष्यं, कृतार्थ-मन्यः अभविष्यम् । यतः पूर्वं मम बहुषु सङ्कटव्यतिकरेषु भवता बहुधा स्वीयः स्नेहमयः हस्तः प्रसारितः । नैतत् विस्मरामि ।

परन्तु इदं वक्तुं मयि लज्जा जायते यदस्माकं निर्माणिकागारे (factory) अधिकारिवर्गीयाणां कर्मकराणां च मध्ये मासद्वयाद् विवादः कश्चन प्रचलति । एतस्य फलत्वेन केचन कर्मकराः सत्याग्रहमारब्धवन्तः । एको मासः उद्घाटितस्य निर्माणिकागारस्य ! कस्यापि कर्मकरस्य वेतनं नास्ति । अग्रे अस्माकं किं भविष्यतीति वयं न जानीमः ।

अहमाशासे अन्यतः कुतोऽपि भवतः समस्या परिहृता भूयात् । ममात्र ईदृशीं परिस्थितिम् अवगच्छन् भवान् माम् अन्यथा न भावयतीति विश्वसिमि ।

इति सविश्वासं

अनन्तमाधवः

३१. सभायां लेखकानवधानात् त्यक्तस्य, किन्तु पत्रलेखकेन उपलब्धस्य संशोधनलेखस्य लेखकं प्रति प्रेषणम्

आर्य ! पुरुषोत्तम !

भवान् यद्यपि मां न जानाति, अहं तु भवन्तं सम्यग् जानामि । कवेर्विशाखदत्तस्य विषये सप्ताहात् पूर्वं विद्याविलासप्रौढशालायाः आवरणे प्रचलितायां विचारगोष्ठ्यां भवान् किल भागम् अगृह्णात् । भवतः संशोधनलेखः अत्यन्तमद्भुतः विचारपरिबृंहितश्च । गोष्ठ्याम् एतस्य पठनानन्तरं केचन प्रच्छकाः यत् प्रश्नान् अपृच्छन्, यच्च भवता प्रत्युत्तरितं तत् सर्वं मम ज्ञानवर्धने नितान्तं साहाय्यकारि आसीत् । भवादृशस्य विदुषः पाण्डित्यप्रकाशनम् अहं प्रत्यक्षीकृतवान् इति हेतोर्नूनम् आत्मानं धन्यं मन्ये । संशोधनलेखस्य पठनानन्तरं भवान् लेखं तं गोष्ठ्याः नियोजकेभ्यः अदात् । परन्तु ते नियोजकाः प्रमादेन तं तत्रैव (विचारगोष्ठीसभाङ्गणे) विस्मृत्य गताः । तत् मया ज्ञातम् । आसन्दिकायाम् आसीत् भवद्रचितः संशोधनलेखः । मया यदा स गृहीतस्तदा भवान् वा संयोजका वा न उपलब्धाः । संशोधनलेखे

भवतः सङ्केतः आसीत् तस्मात्तत्र सूचिताय सङ्केताय अधुना लेखमेतं प्रेषयामि।

इति सनमस्कारं भवदीयः

बालशास्त्री

३२. प्रत्युत्तरम्

आर्य बालशास्त्रिन् ,

भवदीयं .... दिनाङ्कितं पत्रं, तेन सह मदीयः संशोधनलेखः - उभयमपि प्राप्तम् । धन्यवादाः ।

वस्तुतस्तु स लेखः कुत्र नष्ट इति अहम् अत्यन्तं चिन्ताकुलः आसम् । दिवारात्रं तस्य अन्वेषणम् अकरवम् । पुनस्तस्य दर्शनेन मम प्राणा इव प्रत्युज्जीविताः ।

मम लेखस्य प्रेषणाय पुनः पुनः धन्यवादान् भवते समर्पयामि ।

अधुना पल्लवितः भवतः स्नेहः पुष्पितः फलितश्च भूयादित्याशासे ।

इति सहार्दं भावत्कं मित्रं

पुरुषोत्तमः ।

३३. शोकमग्राय बन्धवे मनोधारणार्थं सन्देशः

प्रिय पितृव्य,

श्रुता शोकदा वार्ता । मुहूर्तम् अहं स्तब्धा । अहं कुत्रास्मि, किं करोमि अथवा का अस्मि इत्येव अजानाना निश्चला जाता ।

पितृव्यायाः दर्शनसौभाग्यं मम एकादशदिनेभ्यः पूर्वं लब्धम् । हसन्ती सा मया साकं कीदृशान् विनोदान् अकरोत् ! तस्याः हठात् स्वर्गमनं नूनम् अविश्वास्यम् । परन्तु एतत् सत्यमेव सम्भूतमिति महतो दुःखस्य स्थानम् ।

एतादृशेषु प्रसङ्गेषु किं वक्तव्यमित्येव न स्फुरति । न केवलं भवतः, किन्तु ममापि हृदयं घनीकृतरुधिरं भवति । परन्तु गृहस्य ज्येष्ठः भवानेव यदि शोचन् उपविशति, का गतिर्मादृशीनाम् ?

आर्य, कृपया समाश्वसिहि । पूज्या पितृव्या देहेन न स्यात् । किन्तु चैतन्यरूपेण सन्ततम् अस्माकं हृदयेषु सदाऽपि सा वर्तिष्यते । भगवान् देवः तस्याः आत्मनः संसारमोक्षं दद्यादिति प्रार्थये ।

इति भवदीया

इरावती

३४. मरणवार्ताज्ञापनम्

जानकि,

अनिच्छन्त्या अपि मया कश्चिद् विषयः ज्ञापयितव्य एव । ह्यः मध्याह्ने मम पितामहः स्वर्गस्थोऽभूत् इति ज्ञापयितुं नितरां शोचामि ।

त्रिभ्यो मासेभ्यः तस्य आरोग्यं विषमितम् आसीत् । वैद्याः यद्यपि शक्तिम् अतिक्रम्य करणीयं सर्वमपि अकुर्वन् । परन्तु दैवस्य पुरस्तात् वराकस्य मानवस्य कियत् सामर्थ्यम् ? महताऽपि प्रयत्नेन पितामहस्य प्राणान् शेषयितुं वयं न अशक्नवाम ।

तस्य उत्तरक्रियाकलापे भवती अवश्यम् उपतिष्ठते इति विश्वसिमि ।

इति सवन्दनं

३५. स्पर्धायां पराजितवते प्रोत्साहदाः सूचनाः

प्रिय श्रीवत्स,

सङ्गीतस्पर्धायां त्वं पारितोषिकं न लब्धवानिति हेतोः म्लानवदनः विषण्णोऽसीति ज्ञातम् । एतद्विषये किञ्चित् सूचयितुम् इच्छामि ।

त्वं प्रथमं पारितोषिकं निरीक्षितवान् । तथापि किमर्थम् एवम् अभूत् इति चिन्तनं कुरु, न तु चिन्ताम् । स्पर्धालवः पञ्चाशतोऽप्यधिकाः आसन् । पारितोषिकाणि केवलं त्रीणि । कस्मै पारितोषिकं दातव्यं, कस्मै च न दातव्यम् ?

दश स्पर्धालवः उत्कृष्टम् अगायन् । तेष्वेव पारितोषिकाणि विभक्तव्यानि आसन् । परन्तु प्राथमिकेन एतेन पराजयेन धैर्यं मा अपनयस्व (ಕಳೆದುಕೊಳ್ಳಬೇಡ) । 'कालो ह्ययं निरवधिर्विपुला च पृथ्वी' इति किल भवभूतिः कथयति 'प्रारब्धमुत्तमजना न परित्यजन्ति' इत्याभाणकः । आगामिनि मासे पुनः अन्ताराज्यस्तरीया स्पर्धा आयोज्यते इति त्वं जानास्येव । तत्र भागं गृहाण ।

तीव्रम् अभ्यस्य । हठं प्रथमं पारितोषिकं 'लभै' इति मानसिकम् आग्रहं प्राप्नुहि । त्वं बाढं विजयी भवसि ।

इति तवाभिवृद्धिम् आशासानः[१]

तावकः अग्रजः

---

१. अत्र १८ पत्रस्था टिप्पणी द्रष्टव्या ।

३६. पुस्तकप्रेषणार्थं विज्ञापनम्

मित्र, शोभाराणि !

द्वितीयोऽयं मासः प्रारब्धायाः पाठशालयाः । किन्तु अधुनाऽपि कतिचन पठ्यपुस्तकानि पुस्तकापणेषु न लभ्यन्ते । विशिष्य संस्कृतपठ्यपुस्तकम् । अध्यापकः यद्यपि अध्याप्यं सर्वमपि तितिक्षया (ತಾಳ್ಮೆಯಿಂದ) मन्दमन्दं सम्यग् अध्यापयति । अध्यापितानां विषयाणां ग्रहणं सुलभं, किन्तु धारणं क्लेशाय-पठ्यपुस्तकानां दौर्लभ्यात् ।

यदि मैसूरुनगरे संस्कृतपठ्यपुस्तकम् उपलभ्येत, शीघ्रं प्रेषय । तव उपकारं न विस्मरिष्ये ।

इति तावकीनं मित्रं
मालती ।

३७. सख्युः आरोग्यविषये जिज्ञासा

आर्य ! मृत्युञ्जय, स्वस्ति ।

भवतः आरोग्यम् अधुना पूर्ववत् उन्नतस्तरमेव प्राप्नोतीति श्रुत्वा नितान्तं हृष्टः अस्मि । वस्तुतस्तु गतसप्ताहे अस्माकम् औद्योगिक-संस्थायाः कृते किञ्चित् कर्तव्यजातं मया निर्वहणीयमासीत्, तस्मात् कारणात् अहं बेङ्गलूरुम् आगत एव । परन्तु तदा भवन्तं द्रष्टुं समयावकाशो न लब्धः । इदानीं सुरेशेन भवतः आरोग्यं पूर्वस्तरीयं भवतीति आकर्ण्य मनसि किञ्चिदिव समाधानं सञ्जातम् ।

एवमेव भवान् आरोग्यपूर्णस्तथा दीर्घायुर्भूयादिति आशासे। आगामिनि मङ्गलवासरे पुनरप्येकवारं कर्तव्यनिमित्तं मया बेङ्गलूरुं प्रति आगन्तव्यमस्ति। तदा भवन्तं द्रष्टुं प्रयतिष्ये।

इति तावकीनः

घनश्यामः

३८. स्नेहपत्रम्

सहोदर, चिदम्बर ! नमस्ते।

पञ्चदशदिनानि लिखितपत्रस्य तव। तव मुखदर्शनमपि नास्ति, पत्रमपि नास्ति। तव क्षेमविषये अस्माकम् आतङ्कोऽस्ति; एतत्पत्रप्राप्त्यनुपदं पत्रं प्रेषणीयम्। यदि धनं अपेक्ष्यते, शीघ्रं लिख। अम्बा त्वद्गतया चिन्तया म्लाना जाता। अध्ययनं कथं प्रचलति ? भोजनादिव्यवस्था किं तृप्तिकरी ?

कस्मिन्नपि विषये तव सङ्कोचो मा भूत्। नगरे सङ्कोचेन तवैव हानिः, तेन कोऽपि न लाभः। ग्रामेऽपि तादृशेन स्वभावेन क्लेशो जायते अद्यत्वे, किमुत नगरे? आगामिनि शनिवासरे सायम् अत्रागच्छ, आनन्दय चास्मान्।

अन्यत् सर्वं मुखतः। तवागमनमेव प्रतीक्षे।

इति तावकीनः

सहोदरः

३९. चलच्चित्रवर्णनम्

सखि ! माधवि,

गते भानुवासरे चामुण्डेश्वरीचित्रमन्दिरे 'ओन्दानोन्दु कालदल्लि' इति चित्रं प्रदर्श्यमानम् आसीत् । अहं, मम भ्राता, कृष्णवेणी, सुमा तथा रविकृष्णः एव पञ्च जनाः तत् द्रष्टुम् अगच्छाम । चित्रस्य कथा अतिसरला । द्वौ ग्रामण्यौ (=ಇಬ್ಬರು ಗ್ರಾಮಾಧಿಪತಿಗಳು) स्तः । तौ वस्तुतः सहोदरौ एव । किन्तु तयोः परस्परेण द्वेषः अस्ति । एकस्य दासः गण्डुगलिः, अपरस्य च पेरुमाळ् । एतौ द्वौ अपि प्रथमं युध्यतः, किन्तु ततः एकीभूय स्वामिनोः विरुध्य प्रहरणं कुरुतः । अस्मिन् युद्धे पेरुमाळ् सजीवः शिष्यते, अन्ये सर्वेऽपि म्रियन्ते, गण्डुगलिश्च ।

त्वमेव जानासि चलच्चित्रेषु दश्यमानाः प्रहरणप्रसङ्गाः प्रायेण कृतकाः, विश्वस्तुम् अशक्याभिः भङ्गीभिः विन्यस्ताश्च भवन्तीति । नायकस्य देहे स्वेदलवोऽपि न जायते, तेन (अनायुधेन) स्पृष्टाः प्रतिनायक-पक्षीयाः (सायुधाः सन्तोऽपि) यमलोकं गच्छन्ति !

किन्तु 'ओन्दानोन्दु कालदल्लि' तादृशं नास्ति । प्रहरणसमयेषु सम्भवन् सर्वोऽपि प्रसङ्गस्तत्र सहज एव चित्रितः । अर्थात् श्रमः, खड्गयुद्धस्य स्वाभाविकता, धनुषोऽपि उपयोगः सर्वमपि सहजया रीत्या दर्शितम् । गण्डुगलिपात्रे दि।। शङ्करनाग् तथा पेरुमाळ्पात्रे दि।। सुन्दरकृष्ण अरस् च अस्माकं हृदयं बलवत् आकर्षतः ।

यदा शिवपुरे चित्रमिदमागमिष्यति, एतद् द्रष्टुं मा विस्मर ।

इति सप्रेम तावकीना सखी

विशालाक्षी

४०. अ-प्रतिनिवर्तितस्य पुस्तकस्य प्रतिनिवर्तनाय सूचना

प्रियसखि ! जानकि,

मम पुस्तकं 'मालविका' नामकम् एच्.वि. नागराजराव् रचितम् अहं तुभ्यं दत्तवती द्वाभ्यां मासाभ्यां प्राक् । किन्तु तदद्यापि न प्रतिनिवर्तितम् । तत् पुस्तकं नातीव बृहत् । अपि च त्वम् आशु पठित्रीति प्रसिद्धाऽसि । एतावता कालेन तत् पुस्तकं पठितवत्यैव भाव्यं त्वया । (You might have read) कृपया शीघ्रं तत् प्रतिनिवर्तय । तव सोदरस्य द्वारा पुस्तकं निवर्तयितुं शक्यते यः अस्माकं गृहस्य समीपे वर्तमानं तस्य सख्युः गृहं भूयो भूयः आगच्छति ।

इति स-स्नेहं तावकी सखी

प्रिया

४१. स्वग्रामसंस्मरणम्

मित्र, उषादेवि !

बाल्यकालिकानि स्मरणानि अत्यन्तं मधुराणि किल । 'तादृशा आस्म, एतादृशा आस्म' इत्यादिकाभिः कल्पनाभिः अस्माकम् अन्यदेव विश्वं सृज्यते ।

किमर्थेयं पीठिकेति तव मनसि विस्मयो यद्युत्पद्यते, स हि सहजः । त्वम्, अहम्, अनन्तलक्ष्मीः च एताः तिस्रोऽपि अधुना तिस्रः दिशाः प्राप्तवत्यः । त्वं दिल्लीं गता । अनन्तलक्ष्मीः कलकत्ताम् । अहं पुनर्मैसूरुम् ।

परह्यः अहं मम पत्या पुत्रेण च साकम्, अस्माकं बाल्यकालिकानां कापेयानां (ಕಪಿ ಚೇಷ್ಟೆಗಳ) साक्षिणं बेनकनकेरेग्रामं गता।

अभिज्ञानमेव न जायते ग्रामस्य आस्माकीनस्य ! त्वमेव जानासि, तत्र अस्माकं वासकाले महान् कश्चन वटवृक्षः आसीद् देवमन्दिरस्य पुरस्तात् । सोऽधुना नास्ति । तस्यैव च्छायायां किल अस्माकं क्रीडाः अभवन् । अपि च, देवस्थानं पूर्वमिव नास्ति; बहुवर्णैः शोभते तदधुना ।

अस्माकं बाल्यकाले अस्मान् कापेयकारणात् भर्त्सितवन्तः, किन्तु हृदयेन वात्सल्यपूर्णाः ये आसन् तेषु बहवः वृद्धाः अभवन् । केचन तु न सन्त्येव अस्मिंल्लोके ।

ग्रामस्य स्वरूपमेव परिवर्तितम् । त्वं स्मरसीति मन्ये जलप्राप्त्यै पूर्वं कियान् क्लेशः अस्माभिः सोढव्य आसीत् ! अधुना प्रतिगृहं नलिकाऽस्ति । तथैव विद्याभ्यासविषयेऽपि ग्रामः प्रगतो दृश्यते । अधुना तत्र पि.यु.सि पर्यन्तं विद्याभ्यासस्य सौकर्यमस्ति । पूर्वं तु सप्तमकक्ष्यापर्यन्तमपि शिक्षणं प्राप्तुम् अवसरः न आसीदिति स्मरणं मां विस्मितविस्मितां करोति । कथं शीघ्रं सर्वमपि परिवर्तते !

अस्माकम् अभिमानास्पदं सः ग्रामः सम्पूर्णतः परिवर्तितं स्वरूपं यावत् न दधाति तावत् अस्माभिः तिसृभिरपि सः एकवारं सन्दर्शनीय इति मम मनसि अभिलषितमस्ति ।

आगामिनि एप्रिल्मासे किल शिशूनां परीक्षानन्तरकालिको विरामः । आगच्छ त्वं विरामं प्राप्य । एतद्विषये अनन्तलक्ष्म्यै अपि पत्रं लिखितवती अस्मि ।

तव प्रेष्ठाय पत्ये मम प्रणामा निवेद्याः । तव 'कनीयसी उषा' (Junior Usha) कीदृशी अस्ति ? 'पितृव्या' याः आशीः तस्यै अपि वक्तव्या ।

इति सप्रेमालिङ्गनं तव आत्मीयं मित्रं
माधवी

४२. लघुप्रवासः

प्रेष्ठ सखे, राजमोहन !

ह्यः त्वां शतवारम् अस्मरम् । त्वमपि ह्यः अत्र अभविष्यश्चेत्, कीदृशः प्रमोदोऽभविष्यत् । अहं, वेणुः, माधवः, लता, आशा च एते वयं पञ्च विद्यार्थिनः पद्भ्यां मैसूरुविश्वविद्यानिलयस्य आवरणं (Campus) गन्तुं कृतनिश्चयाः प्रस्थिताः । तदा सायं सार्धपञ्चवादनम् । प्रशान्ते पथि वयं गत्वा प्रथमतः अनावृतं रङ्गमन्दिरं (Open air theatre) प्राविशाम । ग्रीस्देशे वर्तमानम् एतादृशं रङ्गमन्दिरं दृष्टवद्भिः कैश्चन विश्वविद्यानिलयाधिकृतैः तदनुकरणेन एतद् रङ्गमन्दिरं निर्मापितमिति श्रूयते । स्यात् ।

एतस्य रङ्गमन्दिरस्यादर्शभूतं ग्रीक्रङ्गमन्दिरं तथा कौशलेन निर्मापितं यथा रङ्गमन्दिरस्य मध्ये पातितया सूच्या अपि उत्पद्यमानः शब्दः अन्तिमायां पङ्क्तौ विद्यमानेन जनेन स्पष्टं श्रूयते । तादृशम् अद्भुतं मैसूरुविश्वविद्यानिलयीये रङ्गमन्दिरे यद्यपि न गोचरीभवति, तथाऽपि एतत् न अल्पसौन्दर्ययुक्तम् । एतस्य आकारः अर्धवर्तुलः विशालः भव्यो मनोहरश्च । वयं यदा तत्र गतास्तदा मौनमेव तत्रत्यं साम्राज्यम् आसीत् । कोऽपि अपरः जनः न दृष्टः ।

वयं पञ्च जनाः तत्र सोल्लासं परस्परेण हास्यकणिकाः अवदाम, भावगीतानि उच्चैः अगायाम, विनोदप्रदाः कथाः अकथयाम, विचित्राभिः भङ्गीभिः अनृत्याम, तस्य रङ्गमन्दिरस्य वयमेव राजान इतीव अभ्यनयाम च । तत्र अस्मान् प्रष्टा कोऽपि नासीत् ।

तदास्तां नाम । अद्यत्वे किं त्वम् अस्मद्गृहं नैवागच्छः ? किं सर्वदा त्वम् अध्ययननिरतोऽसि ? मा भव ग्रन्थघुणः (bookworm) । पुस्तकमेव न जीवनम् । पुस्तकात् ज्ञातव्यं यथा वर्तते तथा जनैः मिलनादपि ।

अलम् एतेन 'पुराणेन' । आगामिनि शुक्रवासरे पूर्वोक्तस्य 'वानरवंशस्य' भूषणायमानाः वयं चलच्चित्रं जिगमिषवः स्मः । त्वमप्यागच्छ । यदि व्याजं किमपि दर्शयित्वा गृहगुहायां निद्रासि, तव शिखां बलवत् आकृष्य रभसेन त्वां चलच्चित्रमन्दिरं नयामि ।

इति तावकीनः
माधवः ।

४३. विशिष्टः अनुभवः

सत्यवति,

ह्यः सम्भूतां काञ्चन घटनामधिकृत्य किञ्चित् तुभ्यं लिखितव्यमेवेत्येतत् कुतूहलं निरोद्धुं न शक्नोमि ।

त्वमेव जानासि, मम मातुलः श्रीरङ्गपट्टनेऽस्ति, कार्यविशेषान् निमित्तीकृत्य मैसूरुं प्रति पौनःपुन्येन गतागतं करोति च ।

ह्यः अपि सः आगतः, अस्माकं गृहेऽपि तस्य पावनी आकृतिः अवतारं प्राप्नोत् । विशेषस्तु तेन साकं तस्य पुत्री सुजाता, तस्याः

सहोदरः दिनेशश्च आगच्छताम् । ह्यः किल भानुवासरः, तस्माद् वयं त्रयोऽपि जनाः मृगालयं प्रति गन्तुं निश्चितवन्तः । अस्मिन् विषये मम पितृभ्यां, तथा पूज्येन मातुलेन अङ्गीकारोऽपि लब्धः ।

याननिःस्थाने (Busstand) वयं त्रयोऽपि एकहोरापर्यन्तं यानाय प्रतीक्षितवन्तः । यानं नागतम् । अस्माकं महद् वैरस्यम् अभूत् । सुजाता 'पद्भ्यामेव कुतो न गन्तव्यम्'? इत्यवदत् । अद्भुतेयं कल्पना इति कृत्वा वयं ततः पद्भ्यामेव प्रस्थिताः । मध्येमार्गम् अरसुबोर्डिङ्गप्रौढशालासमीपे द्वौ पुरुषौ भूम्यां पतितं किमपि अवलोकयन्तौ अस्माभिर्दृष्टौ । तौ किं तत्रावलोकयतः इति सकुतूहलं वयं पश्यामः - कश्चित् मुग्धः चाटकैरः । (= चटकस्य पोतः ।)

तयोः पुरुषयोः एकतरः तं अङ्गुलीभिः ग्रहीतुं प्रायतत । सः भीत्या हठात् चञ्च्वा अकुट्टत् । परन्तु सः पुरुषः तं न अमुञ्चत् । तौ परस्परं 'एष कथं पालनीयः, अस्माकं तु कार्यविशेषोऽस्ति' इति सम्भाषमाणौ श्रुतौ ।

अहं धैर्येण 'आर्य ! कृपया तम् अस्मभ्यं यच्छ । वयं तं पालयाम' इत्यवदम् ।

सोऽपि हसन्मुखः 'अस्तु, सम्यक् पर्यवेक्षस्व (Lookafter) । एषा पक्षिजातिः अत्यन्तं सूक्ष्मा । सावधानं पालय' - इत्यवदत् । अहं सन्तोषेण चाटकैरं प्रसारिताभ्यां कराभ्यां गृहीतवती । अये ! मम जीवनकाले एव प्रथमवारं पक्षिणं स्पृशामीति पुलकितगात्रा जाता । उष्णः आसीत् चाटकैरः !

वयं मृगालयं न अगच्छाम । चाटकैरं गृहीत्वा गृहमेव प्रतिनिवर्तिताः ।

चाटकैरस्य पर्यवेक्षणकुतूहलेन आक्रान्तानां नः दिवसो गत एष न लक्षितः। विरामं प्राप्य आगच्छ त्वमपि; चाटकैरं द्रक्ष्यसि।

भावत्का सखी

अमृता

४४. प्राच्यविद्यासंशोधनालयसन्दर्शनम्

नन्दलाल,

ह्यः अहं मम मातुलस्य गृहमगच्छम्। सः 'यदि तव अन्यत् कार्यं न विद्यते, आगच्छ मया साकम्' इत्यब्रवीत्। तस्य नेत्रे केनापि रहस्येन पूर्णे इति प्रत्यभाताम्। अहमपि कुतूहलेन अङ्गीकृतवान्।

सः महाराजकालेज्मार्गे माम् अनयत्। मम आश्चर्यं किञ्चिदिव न्यूनीभूतम्। यतः स मार्गः प्रत्यहं मम सञ्चरणपथ एव। 'अरसु' विद्यालयपर्यन्तं मां नीत्वा सः पेविलियन् क्रीडाङ्गणस्य स्थले चलनदिशां परिवर्त्य ततः युवराजकालेज् वास्तुनः (building) प्राक् दृश्यमानं वास्तु प्रति नीतवान्। पुनर्मम कुतूहलमजायत। यतः प्राचीनं तद् वास्तु बहुवारं बहिर्भागतः मया दृष्टम्। सर्वकारीयः कोऽपि विभागः तत्र प्रचाल्यत इति मया तर्कितमासीत्। किन्तु अन्तः प्रवेशविचारः कदाऽपि मम मानसे नाभूत्। अधुना तु मातुलः माम् अन्तरेव नीतवान्। तत्र....

सहस्रशः तालपत्रमयाः ग्रन्थाः !! अहं मातुलम् अपृच्छम्- 'आर्य! के ग्रन्था इमे ? अस्य वास्तुनः किं वा नामधेयम्'?

सः प्रत्यब्रवीत्- 'एते संस्कृतग्रन्थाः । प्राचीनात् कालात् शास्त्रग्रन्थानां काव्यग्रन्थानां च प्रतिलिपयः तालपत्रेषु कृताः । तासां कर्तारः प्रायेण लिपिकराः (Copyists) । यदि तेषां श्रमः न अभविष्यत्, भारतीयायाः संस्कृतेः मूलभूतानाम् एतावतीनां रचनानाम् उपलब्धिः कदाऽपि न अभविष्यत् । एतासां सङ्ग्रहाय, रक्षणाय, यावच्छक्यं प्रकाशनाय च भारते बह्व्यः संस्थाः स्थापिताः सन्ति । तासाम् अन्यतमेयं (one among them) संस्था । शतं वर्षाणि स्थापितायाः अस्याः संस्थायाः । संस्थायाः अस्याः 'प्राच्यविद्यासंशोधनालयः' इति नामधेयम् । बहवः शास्त्रग्रन्थाः अनया संस्थया प्रकाशिताः । सुप्रसिद्धं कौटिलीयम् अर्थशास्त्रम् ऐदम्प्राथम्येन अनयैव संस्थया प्रकाशितम् । बहुवर्णिलः चित्रमयः श्रीतत्त्वनिधिनामकः ग्रन्थः अस्याः संस्थायाः गौरवं वर्धयति' ।

अहमत्यन्तं चमत्कृतः संस्थाया अस्या दर्शनेन । एतादृश्यः संस्थाः भारते कुत्रापि स्युर्नाम, अस्माकं गौरवस्य अभिमानस्य च पात्रं ता इत्यत्र न संशयः । त्वं यदाऽऽगच्छसि मैसूरुं, तदा त्वामपि तत्र नीत्वा दर्शयामि सर्वम् । आगच्छसि ननु !

इति भावत्कः

नागमोहनः ।

४५. सभायाम् अध्यक्षताग्रहणार्थं विज्ञापना

आर्य सिन्धुचरण ! स्वस्ति ।

अस्माकं शालायां बाणभट्टस्य कादम्बरीविषये आगामिनो मासस्य द्विदिनाङ्के शालायाः सभाङ्गणे चर्चागोष्ठी आयोजिता ।

विद्यार्थिनो वयं जानीमो यद् भवान् बाणभट्टस्य विषये बहुधा संशोधनं कृत्वा मैसूरुविश्वविद्यालयतः डाक्टरेट्पदवीं प्राप्तवानिति ।

कृपया अस्याः विचारगोष्ठ्याः अध्यक्षतां भवान् वहतु, अस्मान् धन्यांश्च करोत्विति अभ्यर्थयामः ।

कृपया एतद्विषये सम्मतिसूचकं पत्रं च लिखत्विति सविनयं विनिवेदयामः ।

इति विद्यार्थिसङ्घस्य कार्यदर्शी

राजकेसरी

४६. आह्वानपत्रिका

आचार्य ! कृष्णमनोहरवर्य । स्वस्ति ।

परश्वः अस्माकं शालायाम्, आमन्त्रितानां कतिपयानाम् एव मितसङ्ख्याकानां श्रोतॄणां सभायां विद्वान् नागराजशर्मा 'पाणिनेः अष्टाध्याय्याः वैशिष्ट्यम्' इति विषये भाषिष्यते ।

तस्यां सभायां तत्रभवतः(=पूज्यस्य) गौरवपूर्णया उपस्थित्या वयम् उपकृता भविष्यामः ।

इति विद्यार्थिसङ्घः

४७. स्नेहातिरेक(=ಸಲುಗೆ)पत्रम्

मित्र, सुजाते !

स्वस्ति । द्वौ मासौ लिखितपत्रायास्तव । रे ! किमभूत्तव ? प्रकृत्या त्वम् अलसेति सुप्रसिद्धमिदम् । परन्तु-एतावत् ! एतत्

अनूह्यम् । किं करोषि प्रतिदिनम्? अथवाऽध्ययने गम्भीरं मग्नाऽसि वा? त्वां कथम् अध्ययनशीलेति नूनमहं वेद्मि । सदाऽपि अपरेषां विषये वाचालताप्रदर्शनाद् ऋते तव अन्य: विराभ्यास: (= विरामकालिक: अभ्यास: = habit) कोऽपि नास्तीति किं नाहं वेद्मि ? भो: ! लिख पत्रम् अथवा स्वयमागच्छ । त्वया साकम् आपणो गन्तव्य इति मम प्रबला इच्छा । मङ्गलवासरे आगच्छसि वा? तस्मिन् दिने गणराज्यदिनाचरणनिमित्तक: विराम: भवत्येव किल । भवत: नगरात् यानं प्रात: एव प्रतिष्ठते यत् केवलं सार्धैकघण्टावधौ अत्र प्राप्नोति । बाढम् आगच्छ । तुभ्यम् इड्ली अतितमां रोचत इति मया न विस्मृतम् । इड्लीभि: साकं वर्तिष्यमाणा सती, तव कपि-योग्यं मुखं मङ्गलवासरे प्रतीक्षे । यदि नागमिष्यसि, लत्ताप्रहारं करोमि ।

इति, तावकीना

अलकनन्दा

४८. अभिनन्दनम्

मोहनराम,

त्वं धावनस्पर्धायां प्रथमं पारितोषिकं लब्धवानिति ज्ञातम् । अभिनन्दनानि । पुन: हृदयपूर्वकानि अभिनन्दनानि ।

धावनक्रीडायां भागं ग्रहीतुं यौ प्रोत्साहम् उत्तेजनं च तुभ्यं दत्तवन्तौ तौ, तव पितरौ च, अत्र विशेषत: अभिनन्दनीयौ ।

तौ प्रति कृपया मम नमस्कारा निवेद्या: ।

इति आत्मीय:

सुबन्धु: ।

४९. भाटके न्यूनीकरणाय गृहस्वामिन्यै विज्ञप्तिः

आर्ये कमलाबायि ! स्वस्ति ।

भवत्येव जानाति अस्माकं गृहे किं भवतीति । मम पत्युः उद्योगात् निवृत्तेः अनन्तरं निवृत्तिवेतनम् अद्यापि न प्राप्तमस्ति । मम प्रथमा सुता उद्योगार्थं बहुधा कृतप्रयत्नाऽपि विफला जाता । एतादृशे प्रसङ्गे जीविकानिर्वहणमेव अत्यन्तं क्लेशकरं सञ्जायते ।

अहं नूनं वेद्मि, सुहृदयायां भवत्यां पत्रलेखनस्यावश्यकतैव नास्तीति । यतः पूर्वम् अस्माभिः बहुवारं भाटकदानं विलम्बितम् । तथापि अस्मभ्यम् अक्रुध्वा, भवती, अस्मान् नूनं धन्यान् कृतवती । पुनरपि अस्माकम् असहायां स्थितिं विवृत्य भवत्याः सकाशात् अन्यस्य उपकारस्य करिष्यमाणस्य निरीक्षणं न समीचीनम् । तथापि एतदनिवार्यं संवृत्तम् । कृपया आगामिनः मासादारभ्य, केवलं चतुरो मासान् पञ्चाशद्रूप्यकैः न्यूनं भाटकम् अस्माभिः स्वीकर्तुं भवती अङ्गीकरोतीति विश्वसिमि । तावता कालेन निवृत्तिवेतनं लभ्यते । तदनन्तरं यथापूर्वं भाटकदानं शक्यते । क्लेशोत्पादनाय सक्षमायाचनं,

भवत्याः विश्वासिनी

अभयाम्बा ।

५०. प्रत्युत्तरं-विध्यात्मकम्

आर्ये, अभयाम्ब !

भवत्याः पत्रं दृष्ट्वा मनसि व्यथा जाता । भवत्याः पत्युः निवृत्तिवेतनं नाधुनाऽपि प्राप्तमित्ययं नूनं विषादनीयो वृत्तान्तः ।

एतावति काले भवतां सर्वेषामपि स्नेहपूर्वं शीलं मम हृदये किञ्चन गाढं गौरवम् उत्पादितवत् । एतादृशे प्रसङ्गे यदि धृष्टतां प्रदर्शयेयं;

स्नेहस्य किं मौल्यं भवेत्? यथा भवती पत्रे सूचितवती तथैवास्तु । यदि अन्यदपि साहाय्यं मम सकाशात् भवती निरीक्षते, कृपया सङ्कोचं विना लिखतु ।

इति भावत्का

कमलाबायी

५१. प्रत्युत्तरम्-निषेधात्मकम्

आर्ये! अभयाम्ब!

भवत्याः पत्रं प्राप्तं, तात्पर्यं चावगतम् । भवत्याः एतादृशे कष्टमये प्रसङ्गे साहाय्यकरणं मम कर्तव्यमित्यत्र न कोऽपि संशयः । परन्तु मम केचन क्लेशाः भवत्या न विदिता इति ऊहे । गृह-समीकरणार्थं वित्तकोश (बॅङ्क्) तः ऋणं स्वीकृतवती अस्मि । तन्न प्रत्यादत्तम् । अस्माकं कार्यालये कर्मकराः सत्याग्रहं कुर्वाणाः सन्ति आ-द्वि-मासाभ्याम् । तस्माद् तावतः कालाद् वेतनं न प्राप्तमस्ति । भवत्याः कष्टकाले एतादृश्या रीत्या पत्रं लिखितुं मम हृदयं नाङ्गीकुरुते । तथापि एतदनिवार्यं संवृत्तम् । भवती मयि दोषं न उद्भावयतीति विश्वसिमि ।

इति भवत्याः स्नेहाकाङ्क्षिणी

कमलाबायी ।

५२. आर्थिकस्य व्यवहारस्य विषये - १

सखे गौरवचन्द्र !

गतमासस्य पञ्चदशदिनाङ्के भवता मम सकाशात् रूप्यकाणाम् अष्टशतम् ऋणरूपेण स्वीकृतम्; एकसप्ताहावधौ प्रत्यर्पणं च

प्रतिज्ञातम् । परन्तु गतेऽपि सार्धैकमासे प्रत्यर्पणस्य वार्तैव नास्ति । शीघ्रं प्रत्यर्पयतु धनम् । एषः आर्थिको व्यवहारः स्नेहयुक्तां भावनां मा कलुषीकरोतु । भवता विषयोऽयं सम्यक् चिन्त्यते, एतत्पत्रप्राप्त्यनुपदं धनप्रत्यर्पणं क्रियते चेति विश्वसिमि ।

इति भवदीयः सखा
अनन्तभारद्वाजः ।

५३. आर्थिकस्य व्यवहारस्य विषये-२

आर्ये पद्मलते ! स्वस्ति ।

भवत्या श्रुतवत्या भाव्यं 'सर्वेषामपि शौचानाम् अर्थशौचं परं स्मृतम्' इत्यमुं श्लोकम् । नानाविषयेषु सम्यगध्ययनं कृतवत्याः भवत्याः सकाशे अस्य श्लोकस्य स्मारणं कियदौचित्यं बिभर्तीति नाहं वेद्मि । तथापि एतदनिवार्यं संवृत्तम् । धाष्टर्यं मे क्षमस्व ।

'सुलोचना एण्ड् कम्पेनि' विषये सभायां हस्ताङ्कनपूर्वं भवत्या यदङ्गीकृतं पञ्चलक्षरूप्यकाणां प्रदानं, तस्मिन् विषये यच्च उत्तरदायित्वेन हस्ताङ्कनपूर्वकं मम भागग्रहणमङ्गीकृतं तदुभयमपि भवती सम्यग् वेत्ति । किन्तु भवत्या एका पैसाऽपि नाद्य यावत् प्राप्ता । कम्पेनेः पदाधिकारिणां पुरस्तात् किं स्पष्टीकरणं दातव्यमिति न जानामि । प्रतिदिनमपि कश्चित् पदाधिकारी मां पृच्छति । अस्मिन् विषये भवत्या किमपि करणीयम् । अन्यथा मया अन्यया दिशया चिन्तनस्य रूपणम् अनिवार्यं भवति ।

इति विश्वासिनी
मालिनीदेवी

व्यावहारिकाणि पत्राणि

१. आदेशपत्रम्

तः[१]

भाग्यश्रीः

मल्लेश्वरं, बेङ्गलूरु

दिनाङ्कः......

प्रति

निर्देशकः

ग्रन्थावली, सरस्वतीपुरं, मैसूरु

आर्य,

भवत्संस्थायां सायणभाष्यसमेतः पञ्चसम्पुटात्मकः ऋग्वेदः यदि लभ्यते, कृपया शीघ्रं वि.पि.पि. द्वारा शीघ्रं प्रेषयतु ।

इति भवदीया

भाग्यश्रीः

---

१. यद्यपि केवलस्य प्रत्ययस्य प्रयोगः शास्त्रेण निषिध्यते, तथाऽपि from इत्यस्मिन्नर्थे प्रयुक्तः प्रत्ययोऽयम् अपवाद इति ज्ञातव्यम् ।

२. उपरिनिर्दिष्टस्य पत्रस्य उत्तरम्

तः
ग्रन्थावली
सरस्वतीपुरम्
मैसूरु
दिनाङ्कः.......

प्रति

भाग्यश्रीः, बेङ्गलूरु ।

आर्ये! भवत्याः .... दिनीयं पत्रं प्राप्तम् । अस्माकं संस्थायां सायणभाष्यसमेतः पञ्चसम्पुटात्मकः ऋग्वेदः अस्ति । परन्तु वि.पि.पि. द्वारा तं प्रेषयितुं न शक्नुमः । रेल्वे पार्सल् द्वारा तु तं प्रेषयितुं शक्नुमः । ग्रन्थस्य सर्वेषां सम्पुटानाम् आहत्य मौल्यं २५००/- रूप्यकाणि । आवरणकवचस्य बन्धनं, प्रेषाव्ययश्च अनयोः मौल्यं ३५०/- रूप्यकाणि भवन्ति । भवती २८५०/- रूप्यकाणि प्रेषयतु । तत्प्राप्ति-समनन्तरम् एव वयं रैल्वे पार्सल् द्वारा ग्रन्थं प्रेषयिष्यामः ।

इति भवत्याः सेवाकाङ्क्षी
प्रीतिमान् चक्रवर्ती
(ग्रन्थावलीनिर्देशकः)

३. ग्रन्थसूचीप्रेषणाय विज्ञापना

तः
कलानिधिः
पुष्पाश्रमः, कल्याणनगरी
दिनाङ्कः.........

प्रति
उन्नताधिकारी,
स्वरूपप्रकाशनम्, मध्यप्रदेशः

आर्य,

भवदीयया ग्रन्थप्रकाशनसंस्थया प्रकाशितानां सर्वेषामपि ग्रन्थानां सूचीपत्रं कृपया प्रेषयतु-यद् विलोक्य अभीष्टस्य ग्रन्थस्य प्रेषणार्थम् आदेशं दातुम् अहं शक्नोमि ।

इति भावत्कः
कलानिधिः

४. उपरिनिर्दिष्टस्य पत्रस्य प्रत्युत्तरम्

तः

उन्नताधिकारी

स्वरूपप्रकाशनं, मध्यप्रदेशः

दिनाङ्कः.........

प्रति

कलानिधिः

पुष्पाश्रमः, कल्याणनगरी

आर्य!

भवदीयं....... दिनाङ्कितं पत्रं प्राप्तम् । भवता सूचितेन प्रकारेण अस्माकं प्रकाशनसंस्थया प्रकटितानां सर्वेषामपि ग्रन्थानां सूची प्रेषिता, या अस्मिन् पत्रे संलग्नाऽस्ति ।

ऐषमः (= अस्मिन् वर्षे) अस्माकं संस्थायाः रजतजयन्ती प्रचलति । एतदर्थं द्विमासपर्यन्तम् अस्माकं संस्थया प्रकटितानां सर्वेषां ग्रन्थानां मूल्ये प्रतिशतं विंशतिः (२०) उद्धारः[१] (Discount) लभ्यते ।

सधन्यवादं

भवदीयः विश्वासी

ललितेश्वरः

स्वरूपप्रकाशनम्

---

१. अत्र 'उत्+हारः' इति पदच्छेदः । मूल्ये कस्यचन अंशस्य अपनयनं त्यागो वा इति तदर्थः । अयं शब्दः अस्मिन्नर्थे कोषादिषु लभ्यते ।

५. दत्तस्य आदेशस्य उपसंहारः

तः

शुकदेवी,

विद्यागृहं लेख्यापणः, केरलम्

प्रति

अतीत-सहकारिणी मण्डली

पाणिनिनगरम्

आर्य,

कृपया अस्मदीयं पत्रं .... दिनाङ्कितं (परामर्शसङ्ख्या ४३/२/५७६ अ) परामृशतु ।

तत्र एकटन् मितानि कर्गजपत्राणि तथा शतकूपिकाप्रमाणः निर्यासः (= Gum) एतद् द्वयमपि प्रेष्यं वस्तु (=consignment) प्रेषयितुम् आदेशः दत्तः आसीत् । परन्तु एकसप्ताहात् तस्य विपणिमौल्यम् अत्यन्तं न्यूनं सञ्जातम् । यदि अस्माभिः प्रेष्यं वस्तु अस्मदादेशपत्रस्य अनुसारेण क्रेष्यते, अस्माकम् आयापेक्षया व्यय एवाधिकतरः सञ्जनिष्यते । तस्मद्दत्तस्य आदेशस्योपसंहारः अनिच्छद्भिः अप्यस्माभिः करणीयत्वेन आपतितः (ಮಾಡಬೇಕಾಗಿ ಬಂದಿತು) । भवान् विषयेऽमुष्मिन् अन्यथा न चिन्तयतीति विश्वसिमः । यदा विपणिमौल्येऽस्माकं प्रयोजनकरी काचिद् वृद्धिः भविष्यति, अवश्यमेव वयम् आदेशं पुनः दास्यामः ।

अस्मिन् प्रसङ्गे यः क्लेशः उत्पादितो भवतः तदर्थं भृशं विषीदामः ।

इति सक्षमायाचनं

भवतः स्नेहाकाङ्क्षिणी

शुकदेवी ।

विद्यागृहं-लेख्यापणः

६. दत्ते आदेशे परिवर्तनम्

तः
प्राणाभिरामः
सार्वजनीनापणः
दिनाङ्कः.......

प्रति

जननी उद्यमसंस्था
पतञ्जलिपुरम्

आर्यजन,[१]

अस्माभिः ..... दिनाङ्के (परामर्शसङ्ख्या .....) सहस्रं सूत्रवर्तुलानि, तथा द्विसहस्रं कर्तर्यः, पञ्चशतञ्च सूच्यः - एवं प्रेष्यत्रयं प्रेषयितुम् आदेशः दत्तः आसीत् । तत्र किञ्चित् परिवर्तनमवश्यकमिति आदेशप्रेषणानन्तरं प्रत्यभात् । कृपया एवम् आदेशं परिवर्तितं जानातु भवान् - द्विसहस्रं सूत्रवर्तुलानि, सहस्रं सूच्यः इति । कर्तरीः मा प्रेषयतु । तत्स्थाने 'पञ्चशतं शणनिर्मिताः प्रसेवा' इति परिवर्तनं जानातु । अत्र मूल्यविषये यत् परिवर्तनं भवति तस्य देयकं (= Bill) प्रेषयतु ।

इति भवदीयः विश्वासी
प्राणाभिरामः

---

१. यदा सम्बोध्यजनः स्त्रीः वा पुरुषो वा इति स्पष्टं न ज्ञायते, तदा 'आर्यजन!' इति सम्बोध्यस्य जनस्य सम्बोधनम् उचितम् । जनशब्दः स्त्री-पुरुषयोः उभययोः अपि अन्वेति ।

७. प्रेष्ये वस्तुनि वर्तमानस्य दोषस्य विषये ज्ञापनम् - १

दिनाङ्कः[१].......

मुख्याधिकारी
बिन्दुमोहनापणः
जालाश्रमः, स्वस्तिपुरम्

आर्यजन!

मम .... दिनीयस्य आदेशस्य अनुसारेण भवता .... दिने शतं पोटलिकाः गन्धशालि-जातीयेन तण्डुलेन पूर्णाः मह्यं प्रेषिताः । तण्डुलः निम्नस्तरीयः । तं विक्रेतुं न शक्यते । तस्मात् तत् पोटलिकात्रयम् अहं भवते प्रतिप्रेषयामि (निवर्तयामि) ।

कृपया उन्नतस्तरीयेण दोषदूरेण च तण्डुलेन पूर्णं पोटलिकात्रयं (अन्यत्) प्रेषयतु । यदि तन्न शक्यते पोटलिकात्रयस्य मौल्यं शीघ्रं कृपया प्रतिनिवर्तयतु ।

इति भवदीयः
वाञ्छेश्वरः

---

१. **तः प्रति** इत्यादिकम् इत ऊर्ध्वं नोल्लिख्यते । वाचकैः स्वयं तदूहनीयम् । अपि च सङ्केतादिकमपि वाचकैरेव स्वयमत्र लेखनीयम् ।

८. प्रेष्ये वस्तुनि वर्तमानस्य दोषस्य विषये ज्ञापनम् - २

दिनाङ्कः.......

मुख्याधिकारी,
विश्वान्तक-कार्यागारः
वटोदरः

आर्य, मम .... दिनीयस्य आदेशस्यानुसारेण भवता .... दिने पञ्चाशत् 'स्वस्ति' लेखन्यः प्रेषिताः । तासां पञ्चाशल्लेखनीनां मध्ये दशलेखनीनां कण्टकाः (= Nib) अनुत्कृष्टाः । मया च एतद्विषये त्रिवारं भवतः सकाशं पत्राणि लिखितानि । परन्तु भवतः सकाशात् किमपि प्रत्युत्तरं नासादितं मया । एतच्च चतुर्थं पत्रम् । एतदन्तिममिति भवान् जानातु । यदि पत्रस्य अस्यापि उत्तरं न भवान् ददाति, अहं दशलेखनीनां मौल्यस्य प्रतिनिवर्तनं भवता कारयितुं यत् करणीयं तत् करवाण्येव । भवतः दशदिनावधिकं कालावकाशम् अहं ददामि ।

इति भावत्कः
गौरवगम्भीरः ।

९. आदिष्टात् प्रेष्यात् अन्यतरस्य प्रेष्यस्य प्रेषणात् कृतः आक्षेपः

दिनाङ्कः.........

कार्यनिर्वाहकः
जनवाणी प्रकाशनम्
श्रीरङ्गपट्टनम्

आर्य ! अन्यत् मया अपेक्षितं सूचितं च, अन्यत् भवता प्रेषितम् । सुदर्शनशास्त्रिप्रणीतेन संस्कृतव्याख्यानेन साकं मुद्रितं न्यायभाष्यं प्रेषयितुं मया निवेदनं कृतमासीत् । परन्तु भवता कन्नडटीकासमेतं तत् प्रेषितम् । अहं तत् भवत एव सकाशं प्रेषयामि। शीघ्रं प्रतिप्रेषणस्य मौल्यं, तथा सुदर्शनशास्त्रि-प्रणीतटीकासमेतं न्यायभाष्यम् उभयमपि भवान् प्रेषयतु । मम पत्रे अतीव विस्पष्टं सूचितमासीत् सुदर्शनशास्त्रिप्रणीतव्याख्यासमेतमेव न्यायभाष्यं ममाभीष्टमिति । तत्र 'यदि एतत् संस्करणं न लभ्यते ... अन्यत् किमपि संस्करणं मा प्रेषयतु' इत्यपि लिखितमासीत् । तस्मात् कारणात् अत्र भ्रान्तेः प्रसङ्ग एव नोदेति । तथापि एवं कथमभूदिति भवानेव जानाति ।

इति भवदीया
पद्मश्रीः

१०. उपरि निर्दिष्टस्य पत्रस्य प्रत्युत्तरम्

दिनाङ्कः.........

पद्मश्रीः

विजयनगरम्

आर्ये, भवत्याः .... दिनीयं पत्रं प्राप्तम्, अभिप्रायश्च अवगतः। भवत्याः आदेशे सूचितात् संस्करणात् भिन्नतरं संस्करणं (न्यायशास्त्रीयम्) यत् प्रेषितं तदर्थं विषीदामः, क्षमां च प्रार्थयामः। प्रमाद एवात्र कारणम्।

शीघ्रं भवती अस्माभिः प्रेषितं संस्करणं प्रतिनिवर्तयतु। प्रतिप्रेषणमौल्यं तथा सुदर्शनशास्त्रिप्रणीतव्याख्यासमेतं न्यायभाष्यम् उभयं वयं प्रेषयिष्यामः।

पुनश्च प्रमादात् जातस्य दोषस्य कृते अस्माभिः विषाद्यते।

इति स-क्षमायाचनं,

भवदीयः

वेणुगौरः

जनवाणीप्रकाशनम्

११. प्रेष्यस्य अप्रेषणविषये ज्ञापनम्

दिनाङ्कः........

मुख्याधिकारी

व्यापार-निगमः

बाणनगरी

आर्य, ... दिनाङ्के अधोनिर्दिष्टानां प्रेष्याणां प्रेषणाय आदेशं ददत् पत्रम् अहं लिखितवती-

१. एक-टन्-परिमिताः वर्तुलशङ्कवः (Screws)

२. शतं सन्दंशाः ।

३. पञ्चशतं शण - पोटलिकाः ।

४. पञ्चाशत् कर्तर्यः ।

अद्य यावत् प्रेष्यसामग्री न प्राप्ता । अत्र कारणं न जाने । मया दत्तः आदेशः भवता स्वीकृतो वा न वा तदपि न ज्ञायते । अस्तु । शीघ्रम् एतानि प्रेष्याणि कृपया प्रेषयतु भवान् । इति,

भावत्का

श्वेतमालिनी

१२. उपरिनिर्दिष्टस्य पत्रस्य प्रत्युत्तरम्

दिनाङ्कः........

श्वेतमालिनी

पुण्डरीकनगरम्

आर्ये, भवदीयस्य ...... दिनाङ्कीयस्य पत्रस्य विषये अस्माकम् इयं प्रतिक्रिया - भवत्या लिखितं किमपि आदेशपत्रम् अस्माभिः नैव प्राप्तम् । कारणं न ज्ञायते । अद्यत्वे प्रेषाविभागे केनापि हेतुना पत्राणां प्रेषणे विलम्बः जायते । आस्तां नाम तत्; परन्तु चिन्ता माऽस्तु । भवत्याः द्वितीयं तु पत्रं प्राप्तमेव । तदनुसारेण सर्वं प्रेष्यम् अधुना प्रेष्यते । देयकं (Bill) संलग्नं वर्तते ।

धन्यवादाः

इति भवत्याः विश्वासस्य पात्रं

वाञ्छेश्वरः

व्यापारनिगमः

१३. उपरिनिर्दिष्टस्यैव पत्रस्य अन्यत् प्रत्युत्तरम्

दिनाङ्कः.........

श्वेतमालिनी

पुण्डरीकनगरम्

आर्ये, भवत्याः .... दिनाङ्कीयस्य पत्रस्य धार्टीं दृष्ट्वा अस्माकम् अत्यन्तमेव विस्मयः अभूत् । भवत्याः प्रथमस्य आदेशपत्रस्यानुसारेण अस्माभिः प्रेष्याणि सर्वाण्यपि प्रेषितानि । परन्तु तानि भवत्याः हस्ते न प्राप्तानीति ज्ञात्वा अतीव आतङ्कः समजनि । अस्मिन् विषये सम्बद्धाः सर्वेऽपि जनाः शीघ्रमेव विचार्यन्ते । प्रेष्यस्य प्राप्त्यभावे को हेतुरिति ज्ञात्वा प्रेष्यं भवत्याः सकाशं शीघ्रमेव प्रेषयामः । प्रेष्याणाम् अप्राप्त्या भवत्या यत् क्लेशः सोढव्य आपतितः, (=ತೊಂದರೆ ಅನುಭವಿಸಬೇಕಾಗಿ ಬಂದಿತು) तदर्थं विषीदामः । आगामिनि काले एवं कदाऽपि न भविष्यतीति च प्रतिजानीमहे ।

पत्रलेखनार्थं धन्यवादाः

इति भावत्कः

वटुकभैरवः

व्यापार निगमः

१४. प्रेष्यवस्तूनां प्राप्तौ जातस्य विलम्बस्य विषये आक्षेपः

दिनाङ्कः.......

सहायकाधिकारी

'शुभ्रा'-पट-कार्यालयः, वालिनगरम्

आर्य, अस्माभिः त्रिमासेभ्यः पूर्वं 'चाकचिक्य' नामकस्य पटस्य क्रयार्थम् आदेशः दत्तः, प्राग्धनमपि (advance)[१] समग्रं प्रेषितम् । भवता च केवलं त्रिदिनावधौ तस्य पटस्य प्रेषणं प्रतिज्ञातमासीत् । परन्तु द्विमासानन्तरं प्रेष्यं प्रेषितम् । (तदपि पञ्च स्मारकपत्राणां लेखनानन्तरम् एव) एवंभूतः प्रसङ्गः न प्राथमिकः । पूर्वमपि द्वित्रवारम् इत्थमेव प्रेष्यस्य प्रेषणम् अतीव विलम्बेन कृतं भवदीयेन कार्यालयेन । व्यापारीये व्यवहारे एतादृशं वर्तनं कस्यापि जनस्य गौरवं न वर्धयति, प्रत्युत ह्रासयति । अस्माभिश्च ग्राहकाणां पुरस्तात् प्रतिज्ञातमासीत् 'केवलं सप्ताहावधौ चाकचिक्य-पटः वितीर्यते' इति । परन्तु भवतः एतादृशेन औदासीन्येन अस्मासु स्थिता ग्राहकाणां श्रद्धा शिथिलिता । व्यापारः सदाऽपि ग्राहकाणाम् अनुग्रहमेव अवलम्बत इति खलु सुप्रसिद्धो विचारः । यदि भवतः कार्यालय एवमेव व्यवहारम् अनुवर्तयिष्यते, भवता साकमधुना

---

१. अस्मिन्नर्थे 'सत्यङ्कारः' इति प्राचीनः शब्दः । (किरातार्जुनीये ११.५०)

वर्तमानस्यास्माकं व्यापारस्य स्थगनमनिवार्यमेव भवेदिति सविषादं सूचयामः ।

इति भवदीयविश्वासापेक्षिणी
विनोदिनी
'सोबगु' पटसिद्धापणः
न्यायनगरम् ।

१९. उपरिनिर्दिष्टस्य पत्रस्य प्रत्युत्तरम् ।

दिनाङ्कः...........

विनोदिनी

न्यायनगरम्

आर्ये, भवत्यै धन्यवादाः, या ...... दिनाङ्कितं पत्रं लिखितवती । वयं सम्यगेव जानीमः यदद्यत्वे प्रेष्यवस्तूनां प्रेषणेऽत्यन्तमेव विलम्बः अस्माभिः क्रियते ततश्च उन्नतानां संस्थानाम् उद्यमपतीनां च अतीव क्लेशः जायत इति च । एतदर्थं विषीदामः । परन्तु विलम्बकारणं खलु स्पष्टीकरणीयमस्माभिः ।

अस्माकं कार्यागारे वर्तमानानि वेमातुरीयन्त्राणि (=looms) पुरातनानि । पौनः पुन्येन तानि स्थगितानि भवन्ति । एकस्मादपि वर्षात् नवीनयन्त्रक्रयणाय अस्माभिः प्रयत्नाः क्रियन्ते । किन्तु अस्मदभीष्टं प्रशस्तं यन्त्रं विपणौ एतावत्पर्यन्तं न लब्धमासीत् । अदृष्टवशात् नूतनानि यन्त्राणि अधुना (केवलम् एकसप्ताहात्)

लभ्यन्ते तेषां क्रयार्थम् आधिकारिकाणि सम्भाषणानि आरब्धानि। शीघ्रं तानि अस्माभिः क्रेष्यन्ते। तत ऊर्ध्वं केनापि ग्राहकजनेन प्रेष्यवस्तुप्राप्तिविलम्बजनितः आक्षेपः न करणीयो भवतीति प्रतिजानीमहे।

एतावत्पर्यन्तं यत् क्लेशः - विलम्बजनितः - उत्पादितः तदर्थं क्षमा प्रार्थ्यते। एतदवधि यः अनुग्रहः सहयोगश्च भवत्याः पटसिद्धापणेन अस्मभ्यं दत्तौ तौ आगामिन्यपि काले कृपया अनुवर्तनीयौ इति सविनयं विज्ञापयन्,

भवत्याः विस्रम्भं कामयमानः
अम्बरजालेश्वरः

१६. नवीनोत्पन्नविषये ग्राहकाणां मानसाकर्षिणी विज्ञापना - १

भानुः पूर्वस्यां दिशि एव उदयते - न तु पश्चिमस्यां, न वा दक्षिणस्यां नतराम् उत्तरस्याम्।

परन्तु सः उदयसमकालमेव सर्वासु दिक्षु किरणान् प्रसारयति।

ऊह्यतां कोऽपि 'नवीन भानुः' यः एकस्यां दिशि उदयते सर्वत्र च वार्ताः ज्ञानं च प्रसारयति।

ऊहक्लेशः किमर्थकः? जात एव 'नवीनभानुः!'

भवतः/भवत्याः -

* सरलया प्रसादगुणयुक्तया च संस्कृतभाषया देशीयाः विदेशीयाः च वार्ताः ज्ञातुं कुतूहलमस्ति ।
* चित्ताकर्षकाणां विज्ञानविषयाणां च प्रबन्धानां पठने अभिरुचिरस्ति ।
* हृदयङ्गमेन लिपिविन्यासेन समुपबृंहितायाः संस्कृतपत्रिकायाः क्रयणे उत्कटता अस्ति ।

परन्तु एतदर्थं किं करणीयम्? किं करणीयम्? किं करणीयम्?

एषा भवत्याः/भवतः समस्या !! समस्या !! समस्या !!
अस्माकमपि-समस्या !! समस्या !! समस्या !!
भवत्याः / भवतः सङ्केतः अस्माभिः न ज्ञातः ।
इयमेव अस्माकं समस्या !!!

अत्र अधोनिर्दिष्टे पत्रे भवत्याः/भवतः नाम सङ्केतं च लिखित्वा ...... रूप्यकाणि धनादेशद्वारा प्रेषयतु ।

समस्यानिवारणं भवति ।

ज्ञानोत्पत्तिद्वारा, मनोरञ्जनद्वारा, भाषावबोधस्य अभिवृद्धिद्वारा च ।

पठ्यतां संस्कृतदैनिकी नवीनभानुः !

१७. नवीनोत्पन्नविषये ग्राहकाणां मानसाकर्षिणी विज्ञापना - २

अमुष्मिन् विश्वस्मिन् सर्वान् जनान् काऽपि चिन्ता बाधत एव ।

तासां सर्वासां चिन्तानां मध्ये महत्तमा चिन्ता नाम का? यूयं किं जानीथ?

तज्ज्ञाः कथयन्ति - सम्पादितस्य धनस्य गृहोपयोगिवस्तूनां कृते कथं विनियोगः कर्तव्य इति चिन्ता अपरचिन्तापेक्षया महत्तमा ।

चिन्तामेतां निवारयितुं सरलः कश्चन उपायः अस्ति ! एकवारम् अस्माकं 'सद्म' आपणश्रेणीं पश्यत । झटिति युष्माकं शिरसि वर्तमाना चिन्ता विलयं प्राप्नोति !

अत्र प्रशस्तस्तरीयाणि गृहोपयोगीनि वस्तूनि लभ्यन्ते -

* 'शुद्धि' वस्त्रक्षालनयन्त्राणि
* 'हिमानी' शीतकयन्त्राणि
* 'मारुत' विद्युद्व्यजनानि
* 'ज्वाला' बाष्पचुल्ल्यः
* 'तपन' जलोष्णीकरणयन्त्राणि

सर्वाण्यपि स्पर्धाजनकेन मौल्येन (=competitive price) लभ्यन्ते ।

सुलभा खण्डशः (Instalment) प्रदानपद्धतिः वर्तते ।

प्रातः नव वादनतः रात्रौ नववादनपर्यन्तम् अस्माकं कार्यालयः कार्यनिरतो भवति ।

माध्याह्निकभोजनार्थो विरामः नास्ति ।

भानुवासरेऽपि वयम् उद्घाटित-कार्यालयाः भवामः ।

१८. गणकयन्त्रशिक्षणविषये विज्ञापिका - १

स्वप्नः, स्वप्नौ, स्वप्नाः !

सर्वेषां जनानां मनस्सु सुन्दराः भव्याः स्वप्नाः । परन्तु कति जनाः स्वकीयं स्वप्नं वास्तवत्वेन परिवर्तयितुं शक्नुवन्ति ?

कस्मिन्नपि स्वप्ने वास्तविकतां जनयितुं धनमवश्यकम् ।

धनम् उद्योगेन लब्धव्यम् ।

उद्योगः ??????

बि.ए., बि.एस्सि., एम्.ए., पिएच्.डि., इत्यादिन्यः पदव्यः प्राप्यन्ताम् । ततः उद्योगेन विना समयो याप्यताम् ।

अथवा

'नवीना' केन्द्रे गणकशिक्षणं प्राप्यतां, ततश्च अधिकं च आयम् उत्पादयित्रा उन्नतेन उद्योगेन स्वप्नाः पक्काः क्रियन्ताम् ।

'नवीना' केन्द्रे लब्धगणकशिक्षंणाः सहस्रशो जनाः देशे विदेशेषु च प्रशस्तेषु उद्योगेषु विराजमानाः सन्ति ।

भवत्याः/भवतः अपि तेषां जनानाम् अन्यतमः (=one among them) भवितुम् इच्छा नास्ति किम्?

* नवीनाकेन्द्रस्य सर्वासां शिक्षणपदवीनां भारतस्य सर्वेषां विश्वविद्यानिलयानां मान्यता प्राप्ता ।
* नवीनाकेन्द्रस्य शिक्षणमण्डली दशवर्षेभ्यः अधिकतरम् अवधिं यावत् अनुभवसम्पन्ना ।

* अभ्यर्थिजनस्य वैयक्तिकीं बुद्धिशक्तिम् अनुसृत्य (शनैः वा शीघ्रं वा) शिक्षकजनैः तितिक्षया (=with patience) शिक्षणं दीयते ।

* एतद्विषये अधिकतरं जिज्ञासुभिः स्वस्थलस्य समीपे वर्तमानया 'नवीना' केन्द्रस्य शाखया सम्पर्कः साधनीयः।

नवीनाकेन्द्रे शिक्षणं - नवीनस्वप्नस्य वीक्षणम् !
नवीनाकेन्द्रे शिक्षणं - शिक्षणध्येयस्य रक्षणम् !
नवीनाकेन्द्रे शिक्षणं - पुष्कलं धनं प्रतिक्षणम् !

१९. गणकयन्त्रस्य शिक्षणविषये विज्ञापिका-२

इदं गणकयन्त्रयुगम् ।

सर्वेषां मुखेन गणकयन्त्रं, गणकयन्त्रम् इति जपः क्रियते । परन्तु क्षणं चिन्त्यताम् -

केषाञ्चन प्रश्नानाम् उत्तरं वक्तुं शक्यते वा.-

१. कति जनानां गणकयन्त्रज्ञानमस्ति?

२. विद्यार्थिनः/विद्यार्थिन्यः गणकयन्त्रे कौशलं वहन्ति परन्तु मातापित्रोः विषये किं वक्तव्यम्?

३. लब्धोद्योगाः (वयस्काः) गणकयन्त्रज्ञानं प्राप्तुं यदि वाञ्छन्ति तेषां कृते कति गणक-यन्त्र-शिक्षण-केन्द्रेषु तद्ज्ञानप्राप्तये अवसरः लभ्यते?

४. अद्यत्वे सर्वपत्रिकासु गणक-यन्त्रशिक्षणविषये विज्ञापिकाः प्रकाश्यन्ते। 'लब्धे अमुकशिक्षणे उद्योगः शीघ्रं लभ्यते' इति स्वर्गमिव करतलगतं ताः कथयन्ति । परन्तु कति शिक्षणकेन्द्रैः स्ववचनम् अनुष्ठीयते?

५. भारते सहस्रशः कार्यागाराणि गणकयन्त्रज्ञ-विहीनानि क्लेशम् अनुभवन्तिः सन्ति। एतद् ज्ञानं कतिजनानां विद्यते?

६. यद्यपि गणकयन्त्रेण कार्यं श्रमं न्यूनयति, समीचीनतां च अधिकीकरोति । परन्तु गणकयन्त्रशिक्षणस्य कृते अधिकतमं शुल्कं दातुं सर्वैः जनैः शक्यते किम्?

सर्वेषामपि प्रश्नानाम् उत्तरम् अस्ति !

१. 'गणकपाक' केन्द्रे लब्धशिक्षणाः सहस्रशो जनाः गणकयन्त्रविश्वकोशाः संवृत्ताः ।

२. उद्योगिनां कृते त्वरिततराः शिक्षणस्तराः 'गणकपाक' केन्द्रे उपलभ्यन्ते ।

४. 'गणकपाके' लब्धशिक्षणः कोऽपि जनः निरुद्योगो न भवति। लब्धोद्योगानामपि कृते 'अंशकालिकाः' (Part-time) उद्योगाः लभ्यन्ते ।

५. 'गणकपाके' शिक्षणार्थिनां प्रथमे प्रवचनावधौ एव एतद् ज्ञानं (सविवरणं) दीयते ।

६. भागशः (Instalment) शुल्कप्रदानस्य विविधाः श्रेणयः 'गणकपाके' सन्ति ।

अधिकतरं विवरणं जिज्ञासुभिः स्वस्थलस्य निकटं वर्तमानेन 'गणकपाक' केन्द्रेण सम्पर्कः करणीयः ।

२०. अपेक्षा - १

विद्योन्मीलनी पाठशाला

निरुक्तमार्गः, पिङ्गलभवनम्; श्रद्धानगरी - ४८३५६७८७१

उपरिनिर्दिष्टायां पाठशालायां वर्तमानाभ्यां द्वाभ्यां वेदाध्यापिकापदवीभ्याम् अभ्यर्थनापत्राणि आमन्त्र्यन्ते ।

उद्योगनाम - शुक्लयजुर्वेदकाण्वशाखाध्यापिका

अर्हता : शुक्लयजुर्वेदघनान्त -विद्वत्परीक्षायाम् अथवा तत्समपरीक्षायां न्यूनतमं ८५ अङ्कानां प्राप्तिः ।

अभ्यर्थिनीनाम् आयुर्मितिः : ४५ वर्षाणि ।

अभ्यर्थनापत्रप्रेषणस्यान्तिमो दिनाङ्कः - २८ डिसेम्बर् १९९८

अभ्यर्थिन्यः अङ्कपट्टिकाभिः प्रमाणपत्रैश्च साकमभ्यर्थनापत्रे स्वीयं नाम, सङ्केतः, दूरवाण्यङ्कः (यद्यस्ति) एतानि विवरणानि पूरयित्वा प्रेषयेयुः ।

अन्तिमदिनाङ्कानन्तरं प्राप्तानि अभ्यर्थनापत्राणि परिगणनार्हाणि न भविष्यन्ति ।

यदि अमुष्मिन् विषये अनधिकृतं सम्भाषणं कर्तुं काऽपि महिला प्रयतते, तत् तस्याः अनर्हतां सूचयति । एष उद्योगः केवलं महिलाभ्यः एव । पुरुषाः अभ्यर्थनापत्रं प्रेषयितुं नार्हन्ति ।

२१. अपेक्षा - २

अपेक्ष्यते - बेङ्गलूरुनगरे शीघ्रमेव प्रारप्स्यमाने कस्मिंश्चन अन्ताराष्ट्रियस्तरे कार्यागारे एकः लोहविज्ञानी।

अर्हता - रसायनशास्त्रे एम्.एस्सी. (M.Sc.,) पदवी।

अपेक्षणीयः - लोहसंशोधनकर्मणि न्यूनतमं त्रिवर्षावधिकः अनुभवः।

आयुर्मितिः - ४० वर्षाणि।

अभ्यर्थी लोहवाणिज्यविषये सूचनाप्रदाने समर्थः, ततश्च-सति आवश्यकत्वे-अर्हाणां पुरुषाणां लोहकर्मसु नियोजनेऽपि समर्थो भवेत्।

एताभिः अर्हताभिः रहितानाम् अभ्यर्थनापत्रप्रेषणस्य आवश्यकता नास्ति।

कार्यदर्शी,
आर्यभटलोहसंस्था
अभिवृद्धिपुरम्
बेङ्गलूरु-५६० ०१५

२२. अपेक्षा - ३

प्रज्ञामण्डलसभा

'संवित्' प्रकोष्ठकाङ्कः १३, शास्त्रनगरी-६

उपरिनिर्दिष्टया सभया प्रचाल्यमानायां पाठशालायां व्याकरण-प्राध्यापकोद्योगाय अर्हाणाम् अभ्यर्थिनां सकाशतः अभ्यर्थनापत्राणि आमन्त्र्यन्ते।

वेतनश्रेणी - सर्वकारीयस्य वेतननियमस्य अनुसारेण।

अर्हता - १. व्याकरणविद्वदुत्तमापरीक्षायां तत्समानपरीक्षायां वा न्यूनतमं ७५ अङ्कप्राप्तिः।

२. न्यूनतमं पञ्चवर्षाणि यावत् व्याकरण-शास्त्रप्रवचनानुभवः।

अधुना यस्यां पाठशालायाम् अभ्यर्थिनां नियुक्तिरस्ति तत्-पाठशालाद्वारैव अभ्यर्थनापत्राणि अभ्यर्थिभिः प्रेषणीयानि।

अभ्यर्थिभिः स्वयं प्रेषितानि अभ्यर्थनापत्राणि न परिगण्यन्ते।

अभ्यर्थनापत्राणि १३ आगस्ट् ९८ दिनाङ्के ततः प्राक् वा सभायाः कार्यालयं प्रति प्राप्तव्यानि। तदनन्तरं प्राप्तानि अभ्यर्थनापत्राणि न परिगण्यन्ते।

अस्मिन् विषये कीदृशस्यापि पत्रव्यवहारस्य अवसरः न वर्तते।

गौरवकार्यदर्शी,

प्रज्ञामण्डलसभा

२३. अपेक्षा - ४

मैसूरुनगरस्य सरस्वतीपुरं विस्तरणे अष्टमकक्ष्यायाम् अधीयानानां त्रयाणां विद्यार्थिनां कृते संस्कृतगृहशिक्षकः एकः अपेक्ष्यते । अर्हस्य शिक्षकस्य वेतनमितिः नास्ति । सम्पर्कार्थं दूरवाणी-(५४६)८७३३४२

२४. अपेक्षा - ५

अन्ताराष्ट्रीयस्तरीयायाः संस्कृतशास्त्रग्रन्थप्रकाशिकायाः कस्याश्चन संस्थायाः कृते चार्वाकनगर्याम् एकः सौधः अपेक्ष्यते; यत्र गणकयन्त्रव्यवस्थापनार्थम् अवकाशः सुष्ठुतरः स्यात् । न्यूनतमं द्वादश प्रकोष्ठकानि स्युः । येऽत्र कुतूहलिनः सन्ति तेऽधोनिर्दिष्टेन सङ्केतेन स्वयं सम्पर्कं कुर्युः । मध्यवर्तिजनानामावश्यकता नास्ति ।

हिरण्यगर्भः

सुगिरा-अन्ताराष्ट्रीयसंस्था, आढ्यनगरं,

गङ्गेशोपाध्यायवीथी-मिथिला ।

२५. अपेक्षा - ६

बोधवाहिनी शिक्षणसंस्था,

उद्योगग्रामः, हेमजालमण्डलम्

उपरिनिर्दिष्टायां संस्थायाम् अधोनिर्दिष्टोद्योगानां कृते अर्हैरभ्यर्थिभिः/अर्हाभिरभ्यर्थिनीभिः लिखितानि अभ्यर्थनापत्राणि आमन्त्र्यन्ते ।

उद्योगनाम	**अर्हता**
१. कन्नडं, विज्ञानं, गणितं, संस्कृतं समाजशास्त्रम्- एतेषु शिक्षकजनाः । (सर्वेषु उद्योगेषु त्रीणि त्रीणि स्थानानि)	सम्बद्धे क्षेत्रे एम्.ए. पदवी (न्यूनतमं ७५ अङ्कयुक्ता)
२. एका वाहन चालिका (Driver) (केवलं महिलायाः कृते)	अभ्यर्थिन्या वाहनचालनानुमति पत्रं (ड्रैविंग् लैसेन्स् = Driving Licence) लब्धा भवेत् ।

अभ्यर्थिजनैः अभ्यर्थनापत्राणि उपरिनिर्दिष्टं सङ्केतं प्रति आगस्ट् १५ दिनाङ्के, ततः प्राग् वा प्रेषणीयानि ।

आगस्ट् १५ दिनाङ्कानन्तरं प्राप्स्यमानानि अभ्यर्थनापत्राणि न परिगणयिष्यन्ते ।

आवश्यकतानुसारेण उद्योगस्थानानाम् अनुवर्तनस्य स्तम्भनस्य वा अधिकारः संस्थायाः अस्ति ।

मनोबन्धुरः

कार्यदर्शी ।

२६. अभ्यर्थनापत्रं - शिक्षकस्थानाय ।

मधुरमोहनः

४८६७, सुन्दरवीथी, व्याघ्रनगरम्

गौरवकार्यदर्शी,

स्वस्तिशिक्षणविद्यालयः,

भृङ्गनिवासः भूतेशसौधः, वेधशालापुरम्

१८ जून् १९९४

अयि मान्य,

विषयः - शिक्षकस्थानाय अभ्यर्थना

परामर्शः - ख/६७८/जय १६३

दिनाङ्कः - १०-मे-१९९४

अहम् उपरिनिर्दिष्टं स्थानं 'लोकब्राह्मी' पत्रिकायाम् १५ मे १९९४ दिनाङ्के दत्तायाः विज्ञापिकायाः अनुसारेण अभ्यर्थितुं वाञ्छामि ।

अहं मम व्यक्तिपरिचयं तत्रभवतः कृपावलोकनाय अस्मिन् अभ्यर्थनापत्रे संयोजितवानस्मि ।

लब्धे च उद्योगे शिक्षणक्षेत्रविषयिणीम् उन्नतिं साधयामि इति प्रतिजानामि ।

इति भवदीयः

मधुरमोहनः

नाम - मधुरमोहनः

आयुः - २२ वर्षाणि

जन्मदिनाङ्कः - २, मे, १९७२

पदवी - १. संस्कृतज्ञवरिष्ठ पदवी (१९९२)

२. संस्कृतपण्डितप्रशस्तपदवी (१९९४)

मा

विराभ्यासः - -(=विरामकालिकः अभ्यासः, Habit) सङ्गीतं, चित्रकला च ।

इतरे विषयाः - सरलानि शिशुगीतानि, अतीवसरलाः कथाश्च रचितवानस्मि । एतत् सर्वं 'धारा' पत्रिकायां प्रकटितम् ।

(हस्ताक्षरम्)

२७. अभ्यर्थनापत्रं-शास्त्रशिक्षिकास्थानाय [१]

चन्दनमाला
४८६७, 'आक्रीडः'
प्रथमा मुख्यवीथी, षष्ठी उपवीथी
अष्टाध्यायीपुरम्-४७८३६७१
जनवरी, २३, २००४

गौरवकार्यदर्शी
'सप्तसागर' पाठशाला
देवशिला, किकीदिविनगरम् ।

श्रीमान्य,

जनवरी २१, २००४ दिनीयायाम् 'उन्मीलनी' पत्रिकायां भवता दत्ता विज्ञापिका, भवदीये विद्यालये संस्कृतशास्त्रशिक्षिकायाः आवश्यकतां द्योतयति । अस्मिन् विषये कृपया मदीयान् अर्हताविचारान् ज्ञातुं भवान् सक्लेशः भवत्विति प्रार्थये ।

अहमधुना पञ्चविंशति (२५) वर्षा । अहं १९९८ ईसव्यां महाभाष्यविद्यालयतः नवीनन्याये 'महाविदुषी' बिरुदं प्राप्तवती अस्मि । राज्यस्तरीयासु राष्ट्रस्तरीयासु च वाक्यार्थसभासु बहुवारं सुवर्णपदकानि मया लब्धानि । अनेकासु संशोधनपत्रिकासु मदीयाः संशोधनलेखाः प्रकटिताः । अधुना च कालीशङ्करीयानि क्रोडपत्राणि अधिकृत्य 'विद्यावाचस्पति' पदव्यै संशोधननिरताऽस्मि ।

---

१. अस्मिन् पत्रे विषयगाम्भीर्यम् उन्नतस्तरीयमिति, अस्य अर्थावबोधश्च कष्ट इति च यदि भाति, शिक्षकाः शिष्याश्च एतत् त्यक्तुमर्हन्ति ।

शाब्दबोधविषये मया बहवः संशोधनप्रबन्धाः लिखिताः । तेषां मध्ये कांश्चन प्रबन्धान् चित्वा 'शाब्दबोधशारदा' नाम्नी काचन कृतिः सम्पादिता, यस्याः उपोद्धातः नवीनन्याये गदाधरभट्टाचार्य-शिष्यपरम्परायां प्रख्याततमेन नवीनसार्वभौमभट्टाचार्यमहोदयेन कृतः ।

एतान् सर्वान् विचारान् परिगणय्य, भवान् मां समुचिताम् अभ्यर्थिनीं निश्चिनोतीति विश्वसिमि ।

एतत्तु प्रतिजाने - यद् यदि उपरिनिर्दिष्टे उद्योगस्थाने उपवेष्टुं मम अवसरः दास्यते, बाढम् अहं समीचीनया परिणामकारिण्या च पद्धत्या शिष्याणां पुरस्तात् नवीनन्यायशास्त्रस्य चित्रम् उपस्थापयिष्यामि ।

इति धन्यवादपुरःसरं,

भवदीया

चन्दनमाला ।

२८. अभ्यर्थनापत्रं-विक्रेतृस्थानाय

त्वरितक:
३७५, वाहनवीथी, अङ्गुलीनगरम्,
२३, एप्रिल् २००५

वेमातुरीश्वर:,
उपनिर्देशक:
नीलाम्बरीयपटसंस्था ३६, वर्तुलमार्ग:
चक्रम्-९.

मान्य,

कृपया परामृशतु भवान् - १३/न.क.र./५८३७ दिनाङ्क: १५ एप्रिल् २००५ - इत्यङ्किता विज्ञापिकां, या 'प्रौढोद्यम' पत्रिकाया: एप्रिल्मासीयायां सञ्चिकायां प्रकटिता ।

तस्या विज्ञापिकाया: अनुसारेण भवदीयायां संस्थायां विक्रेतृस्थानं रिक्तमस्ति इति ज्ञातम् । तत्र मम नियुक्तये निवेदनां कुर्वन् एतत् अभ्यर्थनापत्रं प्रेषयामि ।

अहम् आ-दशवर्षेभ्य: विक्रयकलायां चातुर्यं वहन् विविधानि वस्तूनि विक्रीतवानस्मि । लेखनसामग्र्य:, कौशेयवस्त्राणि, मुद्रणयन्त्रस्य भागा: - एवं बहूनां विक्रेयाणां सामग्रीणां विक्रयेण ममास्मिन् क्षेत्रे पर्याप्ता अनुभवपक्वता लब्धा वर्तते ।

पटविक्रयणे मम विशिष्टा अभिरुचि: वर्तते । विविधानां पटानाम् अपेक्षा (demand) जगति अधिकं वर्तत इत्येव तत्र कारणम् ।

अहम् अष्टसु भाषासु (कन्नडं, संस्कृतम्, तमिळु, तुळु, कोडव, इङ्ग्लीष्, तेलुगु, मलयाळं च) निरर्गलं सम्भाषितुं शक्नोमि। एताः किल भाषाः दक्षिणभारते व्यापार-व्यवहारार्थम् अधिकतरम् उपयुज्यन्ते।

एतान् सर्वान् विषयान् परिगणय्य भवतः पट- संस्थायां भवान् यदि मह्यम् उद्योगं ददाति, अहं तस्मिन्नुद्योगे स्थितः सन् सश्रद्धं विक्रयकार्यं निर्वहामि।

इति सधन्यवादं भवदीयः

त्वरितकः।

२९. अभ्यर्थनापत्रम् - अ-विज्ञापितस्य उद्योगस्य प्राप्त्यर्थम् [१]

बिन्दुरामः
३७, लिपिः
कामधेनुपुरम्।

निर्देशकः
'विविधा' अन्तराष्ट्रीयसंस्था
प्रसादनगरम्।

मान्यः

पत्रमेतत् मा क्षिपतु। यदि क्षिपति, अन्ताराष्ट्रियकार्यागारे कृतोद्योगस्य अनुभवसम्पन्नस्य कस्यचित् पुरुषस्य कार्यज्ञानलाभः भवतः संस्थायाः न प्राप्यते।

---

१. यः उद्योगः अ-विज्ञापितः, तत्प्राप्तये अभ्यर्थनापत्रप्रेषणसमये सम्बोध्यो जनः कस्मिन् विषये आसक्तिं वहतीति सम्यग् निर्धारणा करणीया। अपि च, अभ्यर्थिजनेन वाञ्छितम् उद्योगस्थानं रिक्तमस्त्येवेति न नियमः।

अमेरिकादेशस्य न्यूयार्कनगरे बहुषु अन्ताराष्ट्रियकार्यागारेषु संशोधनसहायकत्वेन कृतं कार्यमेव मम अनुभवसम्पत्। तत्र संविदः (contract) आधारेण कार्यं करणीयं भवति। देशभक्त्या प्रेरितः अधुना पुनः भारते कृतपदः अस्मि।

भवतः संस्था अन्ताराष्ट्रियस्तरेऽधुना वर्धमानाऽस्ति। एतदहं सम्यग् जानामि। दशवर्षाणि आरब्धकार्यायाः संस्थायाः भवदीयायाः। मादृशस्य जनस्य अवश्यकता तत्र भवत्येव। यतः कार्ययोजननिर्धारणायां ये तत्र अनुभवशालिनः सज्जनाः सन्ति ते 'पक्वानुभवः कोऽपि जनः अत्र पदं न्यस्यति चेत्, अस्मदीया संस्था आर्थिक्या दृष्ट्या बाढम् अत्यन्तमेव उन्नतं स्तरम् आरोक्ष्यति' इति चिन्तयन्त्येव।

मया यासु संस्थासु पूर्वमनुभवो लब्धः तासां संस्थानां विवरणम् अस्मिन् पत्रे संलग्नमस्ति।

सन्दर्शनाय कृपया कश्चन समयः निश्चीयताम्। अहम् अधिकतरं मदीयं परिचयं सन्दर्शनसमये दास्यामि।

इति स-स्निग्धभावं,
भावत्कः बिन्दुरामः

३०. पत्रिकासम्पादकं प्रति पत्रम् - १

अयि सम्पादकमहाशय,

अस्माकं ग्रामः राजधान्याः अतिसमीपे वर्तते। परन्तु यः जनः रात्रौ एतं ग्रामं प्रविशति, सः भीतः एव भवति। वीथीषु विद्युद्दीपः नास्ति। उद्घातिनी च वीथी (=ದಾರಿಯು ಹಳ್ಳದಿಣ್ಣೆಗಳಿಂದ ಕೂಡಿದೆ)। प्राथमिकी शाला यद्यप्यस्ति, परन्तु २०० छात्राणां कृते तत्र एक

एवाध्यापकः । सोऽपि स्वकीयायाः इच्छायाः अनुसारेण सप्ताहे एकवारं द्विवारं वा आगच्छति । अस्माकं राष्ट्रः पञ्चाशं स्वातन्त्र्योत्सवम् आचरति । परन्तु ग्रामीणभारतम् अधुनाऽपि शिलायुगे वर्तते । अस्मदीयाः राजकीयधुरीणाः किं कुर्वन्ति ?

अस्माभिः विषयेऽमुष्मिन् बहवः शासकाः सांसदाश्च प्रार्थिताः। शतशः पत्राणि लिखितानि । परन्तु प्रयोजनं शून्यमेव । उपवाससत्याग्रह एव अस्माकमधुना शरणम् ।

ग्रामीणाः

प्रगतिशीलग्रामः ।

३१. पत्रिकासम्पादकं प्रति पत्रम् - २

अयि, सम्पादकमहाशय,

'प्रामाणिक' नगरे लोकयानानि (Buses) कदाऽपि याननिःस्थानेषु पूर्वनिर्धारिते समये नायान्ति । कदाचित् अर्धघण्टावधिं विलम्बं, कदाचिच्च एकघण्टावध्यधिकं च विलम्बं कुर्वन्ति । कृतायां विचारणायाम्, एतद् ज्ञातं यद् अद्यत्वे यानसंस्थानिर्देशकः कोऽपि अनुभवलेशरहितः नियुक्तः, यः समीचीनां निर्देशनां यानचालकेभ्यः दातुमसमर्थः । अस्मिन् विषयेऽहं बहुवारं यान-संस्थासम्बद्धेभ्यः अधिकारिभ्यः पत्रं लिखितवानस्मि । मन्ये तानि सर्वाण्यपि पत्राणि अवकरपिटके (Waste paper basket) प्रक्षिप्तानीति ।

तस्मात् पुनरपि एतत्पत्रिकाद्वारा सम्बद्धान् अधिकारिणो विज्ञापयामि यत् यानानि काले (on the time) याननिःस्थानि यथा प्राप्नुवन्ति तथा ते कुर्वन्त्विति ।

सुयानप्रियः

प्रामाणिकनगरम् ।

३२. पत्रिकासम्पादकं प्रति पत्रम् - ३

अयि सम्पादकमहाशय,

भवदीयं, ३ (जनवरी) दिनीयं सम्पादकीयं वित्तस्फाति (Inflation) विषये जनतायाः अभिप्रायं सम्यक् प्रतिनिदधाति (Represents) । प्रतिदिनं किमपि व्याजं निमित्तीकृत्य वित्तं स्फाययन्त्येव राजकरणिनः । सर्वकारीयात् प्रकटनाद् ज्ञायते यत् इतः सप्ताहादूर्ध्वं शर्करा, तण्डुलः, गोधूमः, पाकार्हतैलानि च- एतेषां सर्वेषां वस्तूनां मूल्ये स्फातिः भवति (rise in prices) । साधारणी जनता कथं जीविकां निर्वहतीति चिन्ता एव राजकरणिनां नास्ति । धनिकास्तु कीदृश्यापि मूल्यस्फात्या कम्पिताः न भवन्ति । चिन्ता तु अस्मादृशामेव जनानाम् ।

विरोधपक्षीयाः अस्मिन् विषये किं कुर्वन्ति ? सर्वकारो यत् यत् करोति तस्य सर्वस्य कृते 'जयकारं' कर्तुं किं तेऽस्माभिः निर्वाचिताः ?

धनिकेश्वरः
श्रीनिबिडपुरम्

३३. पत्रिकासम्पादकं प्रति पत्रम् - ४

सम्पादकमहाशय,

प्रायेण सर्वत्र वाचकलिखितेषु पत्रेषु विषादस्यैव ध्वनिर्वर्तते । परन्तु मदीयमिदं पत्रं विषादं सूचयितुं न लिख्यते परन्तु मदीयम् आनन्दं वाचकेषु विभाजयितुम् ।

पूर्वं वाहिनीनद्याः कारणात् **स्पष्टग्रामः अस्फुटतरग्रामः** एतयोः द्वयोः ग्रामयोः सम्पर्कः अत्यन्तं क्लेशेनैव साध्यः आसीत् । शकटानि महिषमण्डलं गत्वा ततः दिशापरिवर्तनं कृत्वा तदनन्तरमेव स्पष्टग्रामं गन्तुं प्रभवन्ति स्म । स्पष्टग्रामसमीपे सेतुनिर्माणार्थम् अ-राजकीय-तान्त्रिकसंस्थानां (=private technological institutions) परतः योजनापत्राणि सर्वकारेण आमन्त्रितानि । तत्र द्वे एव संस्थे प्रतिक्रियां दत्तवत्यौ । एका संस्था ३५ कोटिरूप्यकाणि तथा अपरा ५० कोटिरूप्यकाणि अपेक्षितवत्यौ । तस्मिन् प्रसङ्गे सर्वकारीय एव कश्चन पक्वानुभवः अभियन्ता (Engineer) श्रीमान् 'सेतुप्रियः' स्वीयं योजनापत्रं मण्डयामास सम्बद्धानामधिकारिणां पुरस्तात् । तत्र आहत्यमौल्यं केवलं नवकोटिरूप्यकाण्येव आसन् !! संस्थाद्वयेन मण्डितयोः योजनापत्रयोः सूचितात् आहत्यमौल्यात् श्रीमतः सेतुप्रियस्य योजनापत्रे सूचितम् आहत्यमौल्यमतीव न्यूनतरम् । तस्मात् सन्देहग्रस्ताः अधिकारिणः विकाङ्क्षां (Hesitation) कृतवन्तः । परन्तु अनेकवारं कृतप्रयत्नः श्रीमान् सेतुप्रियः अधिकारिणां हृदयं विजितवान् । फलतः सेतुनिर्माणस्य अधिकृतमादेशं श्रीमते सेतुप्रियायैव अधिकारिणः अयच्छन् ।

श्रीमान् सेतुप्रियः केवलं सार्धैकवर्षावधौ सेतुनिर्माणं सहोद्योगिनां कर्मकराणां च साहाय्येन अकरोदिति नूनमभिनन्दनार्हः सः । (पूर्वमुल्लिखिते द्वे संस्थे तु कार्यसमाप्त्यै पाञ्चवार्षिकमवधिं सूचितवत्यौ ।)

अतीवसन्तुष्टाः ग्रामीणाः श्रीमतः सेतुप्रियस्य अभिनन्दनार्थं काञ्चन सभामायोजितवन्तः । तत्र श्रीमतः सेतुप्रियस्य अभिनन्दनभाषणानां वृष्टिरेव अभवत् । श्रीमान् सेतुप्रियस्तु अत्यन्तं

विनयेन 'मया यत् कृतं तत्र सम्बद्धा अधिकारिणः, सहोद्योगिनः कर्मकराश्च नूनम् अभिनन्दनार्हाः - येषां परिश्रमं विना कार्यमेतत् सफलं न अभविष्यत्' इत्युवाच ! एतेन पत्रेण वयं पुनः श्रीमतः सेतुप्रियस्य कार्यदक्षतां प्रति सहस्रं प्रणामान् समर्पयामः ।

अधुना एष सेतुः वाहिनीनद्याः उपरि विराजते । एकं ग्रामं प्रत्यपरेण ग्रामेण प्रयाणं केवलं दशनिमेषावधिकं संवृत्तमनेन सेतुना । यदि सर्वकारीया अभियन्तारः सश्रद्धं कर्म कुर्युः कीदृशानि अद्भुतानि साधयेयुः इत्यस्य अयं भव्यः सेतुः प्रत्यक्षं साक्षि विद्यते ।

परन्तु इदम् अतितमां विषादस्य विषयः यद् राजकरणिभिः क्रियमाणेभ्यः निरर्थकेभ्यः भाषणेभ्यः भूरि प्रचारं यच्छन्त्यः पत्रिकाः - कुत्रापि एतस्य सेतोः विषये एकं वाक्यमपि न अलिखन् ।

पथिकः

अस्फुटतरग्रामः

३४. पत्रिकासम्पादकं प्रति पत्रम् - ५

सम्पादकमहाशय !

ऐषमः (= एतस्मिन् वर्षे) 'एष्याड्' क्रीडायाम् अस्माकं क्रीडालवः पञ्चत्रिंशत् पदकानि विजितवन्तः इति यत्, तत् सर्वेषां भारतीयानाम् अतीव अभिमानास्पदम् ।

प्रायेण एतादृशीषु अन्ताराष्ट्रियस्पर्धासु स्पर्धा अतीव क्लिष्टा वर्तते । तत्र प्रवेशलाभ एव क्रीडालुम् उन्नतस्तरीयं द्योतयति । एवं

स्थितौ, तत्र पदकानां प्राप्तिः नाम न बालक्रीडा - तत्रापि चीना-कोरिया-जापान्-प्रभृतिराष्ट्राणां क्रीडालवो यत्र भागं वहन्ति । तत्र अपरेषां राष्ट्राणां स्पर्धालुभिः एकस्यापि पदकस्य कृते महत् साहसं करणीयम् । तादृशं साहसं कृत्वा आस्माकीनाः क्रीडालवः सप्त सौवर्णानि पदकानि प्राप्तवन्त इति ते नूनम् अस्माकमभिमानस्य पात्रम् ।

परन्तु एतावता न अलम् । भारतमतीव विशालं राष्ट्रम् । भारतस्यापेक्षया कोरिया, जापान् च लघुतरौ देशौ । तयोः क्रीडासिद्धीः यदि परिशीलयामः, भारतीयानां शिरः अवनतमेव भवति । चतुर्वर्षानन्तरं पूसान् नगरे याः एष्याड् क्रीडाः आयोजयिष्यन्ते तासु अस्माकं क्रीडालवः वीरयोधतां प्रदर्श्य, आयोधनमेव कृत्वा भारतं प्रथमस्थाने स्थापयन्त्विति आशासे ।

क्रीडामण्डनः

खेलोत्सवपुरी ।

जगन्नाथविरचितम्
अभिनवसंस्कृतसाहित्यम्

१.	टुप् कविताः	६-००
२.	ऋजुरोहितम्	८-००
३.	पुण्डरीकः	३०-००

उपरिनिर्दिष्टानि पुस्तकानि भारतीयविद्याभवनात् प्रकाशितानि भवनादेवोपलभ्यन्ते ।

सुरभारतीप्रकाशनस्य अभिनवग्रन्थरत्नानि

१.	संस्कृतगद्यलेखावली	२५-००
२.	पद्यमणिमाला	२०-००
३.	गद्यरत्नमञ्जूषा	३०-००
४.	सुभाषितसमुच्चयः	१५-००
५.	हस्यमधुबिन्दवः	१०-००
६.	पत्रसौधः	३०-००

जगन्नाथविरचितः

पत्रसौधः

अस्मिन् ग्रन्थे

- त्रिपञ्चाशत् (५३) वैयक्तिकानि पत्राणि ।
- चतुस्त्रिंशत् (३४) व्यावहारिकाणि पत्राणि ।
- शुद्धा प्रसन्ना च संस्कृतभाषा ।
- शैथिल्यहीना दृढा च वाक्यशैली ।
- झटिति वाक्यस्य अर्थं ज्ञापयन् क्रमः ।
- बालकानां, बालिकानां, युवकानां, युवतीनां, पुरुषाणां स्त्रीणां - **सर्वेषाम् अपि जनानां** प्रयोजनम् जनयन् पत्राकारः ।
- संस्कृतेन शुद्धं लिखितुम् इच्छतां **सर्वेषां** स्फुटं मार्गदर्शनम् ।
- संस्कृतपत्रद्वारा जीवनस्य नानामुखानि परिचाययन् उन्नतः स्तरः ।
- प्राचीनशैली-नवीनशैल्योः मनोहारी समन्वयः ।

मूल्यम् - ३० रूप्यकाणि